वर्षम्-१ अङ्कः-४

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५१११ वैक्रमाब्दः २०६६ चैत्रशुक्ल ६ – आषाढशुक्ल ८ शकः १९३१ अप्रैल - जून २००९



## स्वागतम् अध्यक्षवर्याय

०८-८-१९४८ तमे वर्षे श्री हीरालाल-कैलासराणी-सिब्बलदम्पत्योः आत्मजत्वेन पञ्जाबप्रान्तस्य जालन्धरे लब्धजन्मा श्रीमान् कपिलसिब्बलः शैशवं कैशोर्यं चातिक्रम्य इतिहासविषये, विधिशास्त्रे च स्नातकोत्तरपदवीं (LL.M) प्राप्नोत्। दिल्लीविश्वविद्यालयस्य सैण्ट्-स्टीफन्-महाविद्यालये, अमेरिकादेशे हार्वर्ड-विधिशास्त्रविद्यालये च प्राप्तविद्यः एषः आरम्भे अधिवक्तृत्वेन वृत्तिं समाश्रितवान्। १९७३ तमे वर्षे कृतोद्वाहः एषः द्वयोः पुत्रयोः पिता वर्तते। जीवने उत्तरोत्तरं वृद्धिम् अवाप्य १९८९- दिसम्बरमासतः १९९० दिसम्बरपर्यन्तं भारतस्य अपरमहाधिवक्तृरूपेण (Additional Solicitor General of India), १९९८ तः २००४ पर्यन्तं राज्यसभा-सदस्यत्वेन, अपि च २००० तः २००२ पर्यन्तं संयुक्त-संसत्समिति-सदस्यत्वेन, २००१ तमे वर्षे वाणिज्यपरामर्शसमितिसदस्यत्वेन, २००२तमे वर्षे गृहव्यवहार-समितिसदस्यत्वेन च कार्यं निरवहत्। २००४ तमे वर्षे चतुर्दश-लोकसभानिमित्तं निर्वाचितोऽभूत्। २३-५-२००४ तः 'विज्ञान-प्रौद्योगिकी एवं पृथिवीविज्ञानम्' इति विभागस्य केन्द्रीयमन्त्रिपदं, जलसंरक्षण-प्रबन्धनविषयककार्य-विशेषम् उद्दिश्य घटितसमितेः उपाध्यक्षपदं च व्यभूषयत्। २००९ तमे वर्षे पञ्चदशे लोकसभानिर्वाचने चितः सन् सम्प्रति **मानव-संसाधनविकासमन्त्रिपदे** प्रतिष्ठितः। एवं गुणविशिष्टः तत्रभवान् श्री कपिलसिब्बलमहोदयः अस्माकं **राष्ट्रियसंस्कृतसंस्थानस्य सम्मान्यम् अध्यक्षपदमप्यलङ्करोतीति** हर्षप्रकर्षं प्रकाशयामो वयम्।



नाट्यकार्यशालाम् उद्घाटयन्
कुलपतिः रा.व. त्रिपाठी



नाङ्गियरकूट्टुकलां प्रदर्शयन्ती
इन्दुमधुः

## कुलपति-वाक्

संस्कृतवार्तायाश्चतुर्थोऽयमङ्कः। एतस्य प्रकाशनेन सह राष्ट्रियसंस्कृतसंस्थाने कुलपतिकार्यं निर्वहतो मम प्राय एकं वर्षमवसीयते। तथैव संस्थानपरिसरेषु एतत्सम्बद्धमहाविद्यालयेषु च समारभ्यते नवीनं सत्रम्। अस्मिन्नेकवर्षस्य अवधौ संस्थानस्य प्राध्यापकैः अधिकारिभिः कर्मचारिभिश्च यः परिपूर्णः सहयोगः सर्वविधप्राशासनिकशैक्षणिक-कार्यसम्पादने मह्यं वितीर्णस्तस्य कृते हार्दिकीं कृतवेदितां विज्ञापयामि। नवीनसत्रारम्भे च सर्वेभ्यः शिक्षकेभ्यश्छात्रेभ्यश्च शुभकामनाः समर्पयामि।

अथ मई-मासे भारतशासनस्य नवीनं मन्त्रिमण्डलं शपथमगृह्णात्। विधिविशारदाः श्रीमन्तः कपिलसिब्बलमहोदयाः मानवसंसाधन-विकासमन्त्रित्वेन कार्यभारं गृहीतवन्तः। ते सम्प्रति राष्ट्रियसंस्कृतसंस्थानस्य अध्यक्षाः। एतेषां हार्दिकम् अभिनन्दनम् कुर्मः। एतेषां मार्गदर्शने संस्थानस्य सर्वविधमभ्युदयमाशास्महे। संस्थानस्य पूर्वाध्यक्षान् श्रीमतः अर्जुनसिंह-महोदयान् प्रत्यपि तेषामवदानाय कृतज्ञतां प्रकटीकुर्मः।

एकस्मिन् वर्षे संस्थाने अभिनव-समुन्मेषक्रमे सुविहिता विविधा उपक्रमाः। संशोधितानाम् अद्यतनपाठ्यक्रमाणां प्रवर्तनं नवीनसत्रे जायते। पाठ्यचर्यायां सेमेष्टरप्रणाली सिद्धान्ततः अङ्गीकृता। रिक्तानि शैक्षणिक-पदानि पूरितानि, चिरप्रत्याकाङ्क्षताः पदोन्नतयः सम्पादिताः। संस्थानस्य शोधपत्रिका संस्कृत-विमर्शाह्वा पुनः प्रकाशनेनानुसन्धानस्य नूत्नाः दिशः प्रकटीकरोति। संस्कृतस्य वैश्विकीं प्रतिष्ठां कामयमानाः वयम् अन्ताराष्ट्रियामनुवादपत्रिकामपि प्रकाशयितुं सन्नद्धाः। वैज्ञानिकपद्धतिभिः संस्कृतानुशीलनसंवर्धनाय शब्दकल्पद्रुम-प्रमाणवार्तिक-सूर्यसिद्धान्तादि-ग्रन्थानाम् ई-पाठान् निर्माप्य तेषां विश्वव्यापिजालपुटे (website) निवेशो विधीयते। नवीनकार्यक्रमेषु अखिलभारतीय-संस्कृतकविसमवायः, अखिलभारतीयसंस्कृतनाट्यमहोत्सवः, नाट्यकार्यशाला च आयोजिताः। उत्तरपूर्वराज्येषु संस्कृतशिक्षाविकासाय सविशेषमवधीयते, एतदर्थं च समायोज्यते सिक्किमप्रदेशे गेङ्टोकनगरे संस्कृतसम्मेलनम्।

एकविंशशतके संस्कृतविद्यायाः परः प्रकर्षः प्राकट्यमेष्यतीति मन्यामहे।

*–राधावल्लभः त्रिपाठी*

**मुख्यपरामर्शदाता**

प्रो. राधावल्लभः त्रिपाठी

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

डॉ. एन्. आर्. कण्णन्, लखनऊ

डॉ. जि. गङ्गन्ना, पुरी

प्रो. रामानुजदेवनाथः,शृङ्गेरी

प्रो. विश्वमूर्तिशास्त्री, जम्मू

प्रो. सुरेन्द्रझाः, इलाहाबादम्

प्रो. आजादमिश्रः, भोपालम्

डॉ. प्रकाशपाण्डेयः, गरली

प्रो. के.टी. माधवन्, गुरुवायूरु

प्रो. अर्कनाथचौधरी, जयपुरम्

प्रो. एम्.ए. बाबुः, मुम्बई

**सम्पादकमण्डलम्**

डॉ. शुक्ला मुखर्जी

डॉ. रत्नमोहनझाः

कू. वेङ्कटेशमूर्तिः

**सहयोगी**

प्रफुल्लगडपालः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

प्रकाशकः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058

011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

## प्रतिवार्ता


संस्कृतवार्ता
राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्
सम्पादकीयम्

संस्थानेन प्रकाशितायाः संस्कृत-वार्तायास्त्रयोऽप्यङ्काः समधिगताः पठिताश्च। उत्तमकोटिके सुन्दरे च कर्गदे आकर्षकमथ च बहुरङ्गीयं सचित्रमेतस्य मुद्रणं पाठकान् पत्रिकामान्तं द्रष्टुं विवशीकरोति। एतदर्थं नूतन-कुलपतिः आचार्यः राधावल्लभत्रिपाठिवर्यः सर्वथा अभिनन्द्यः। तस्य कल्पनाप्रसूतम् एतच्च त्रैमासिकं वार्तापत्रं राष्ट्रिय-संस्कृत-संस्थानस्य हृद्यां गाथां, धवलां कीर्तिं नैसर्गिकीञ्च संस्कृत-प्रीतिं देश-विदेशेषु सर्वत्र वितनोतीति महतः प्रमोदस्य विषयोऽस्माकं समेषां संस्थानीयानां कृते। प्रत्यङ्कमप्यत्र नवीनं स्तम्भं दर्शं दर्शं नितरां मोमुद्यतेऽस्माकं चेतः। 'प्रतिवार्ता' इति स्तम्भे पाठक-प्रतिक्रियाः, 'मधुरस्मृतयः' इति स्तम्भे संस्थानसम्बद्धाः काश्चन मधुराः स्मृतयः, 'कुलपतेः दैनन्दिनी'ति स्तम्भे कुलपतिवर्याणां त्रैमासिकी कार्यसूची, 'वृत्तदर्पणे संस्थान'मित्यत्र पत्रपत्रिकासु चर्चितानां संस्थानीयोपलब्धीनां सचित्रमुलेखः, 'छात्र-प्रातिभ'मित्यत्र संस्थानच्छात्राणां प्रतिभाविवरणञ्च अतीव प्रेरणाप्रदम्। एतदतिरिच्य संस्थानसम्बद्धा नवनियुक्ति-सूचना, प्रोन्नति-सूचना, तदर्थमभिनन्दनम्, विद्वद्व्याख्यानम्, सङ्गोष्ठीविवरणं, विद्वत्सम्माननम् तथा संस्थाने सम्पन्नाः विविधमहोत्सवाः कार्यक्रमाश्चेत्यादयः नैके संस्थान-सम्बद्धाः प्रसङ्गाः चर्चिताः सन्तश्चित्तं प्रसादयन्ति। इतः पूर्वमस्मत्सविधे न कोऽपि तादृशः सार्वजनीनः सहजो वा कश्चिन्माध्यम आसीद् येनास्माभिः संस्थाने प्रवृत्तं महत्त्वपूर्णं घटनाजातं लोकलोचनमानेतुं शक्यमासीत्। वस्तुतः संस्थाने तत्परिसरेषु च कुत्र किं घटते इति ज्ञातुं संस्थानीया अपि क्लेशमनुभवन्ति स्म। किन्तु इदानीं संस्थानस्य प्राध्यापकाश्छात्राश्च वार्तापत्रे आत्मानं द्रष्टुं किमपि विशेषमाचरितुमवश्यं प्रयत्नशीला भविष्यन्तीति विश्वसिमि। अद्यावधि प्रकाशितानां त्रयाणामङ्कानां पर्यालोचनानन्तरं मयाऽनुभूतं यदत्र स्थायि-स्तम्भरूपेण इतोऽपि केचन अन्ये स्तम्भाः योजयितुं शक्यन्ते। तद्यथा अत्र 'अभिनवसाहित्य'मिति कश्चन स्तम्भो यदि स्यात्तर्हि तत्र केवलं संस्थानीय-लेखकानां लघ्व्यः कथाः, कविता वा प्रकाशिताः भवेयुः। एवमेव प्रत्यङ्कं क्रमशः संस्थानीय-महत्त्वपूर्ण- प्रकाशनानां लघ्वी पुस्तक-समीक्षाऽपि 'समीक्षायण'मित्येतादृशे कस्मिंश्चित् स्तम्भे प्रकाशयितुं शक्यते। अपरञ्च, अत्र यदि कश्चन स्तम्भ एतादृशोऽपि भवेद् यत्र संस्थानाद् बहिः देश-विदेशेषु सङ्घटितानां घटिष्यमाणानां च संस्कृत-कार्यक्रमाणां सूचना स्यात्तर्हि मन्ये एतेनापि संस्थानस्य प्राध्यापकाश्छात्राश्च लाभान्विताः स्युः। यथाकालमेषा संस्कृतवार्ता मासिक्यपि स्यादिति कामयमानो विरमामि।

**बनमाली बिश्वालः** (गङ्गानाथ-झा-परिसरः)

संस्कृतवार्तायास्तृतीयाऽङ्कोऽधिगतः। कविसत्तमः विपश्चिदपश्चिमः त्रिवेणीकविः त्रिवेणीतटे संस्थिते संस्थानपरिसरे अतिथ्याचार्यत्वेन नियोजित इति हर्षदं वृत्तम्। 'संस्कृतवार्ता'-पत्रं राष्ट्रियसंस्कृतसंस्थानस्य प्रायः सर्वैरेव कार्यक्रमैः, प्रमुखाभियोजनाभिः, विदुषां विविधविद्याविलासैश्च परिचाययति इत्यस्य नितराम् औपकारिकत्वम्। संस्थानेन न केवलं गतदशाब्देभ्यो निरुद्धप्रकाशनस्य 'संस्कृत-विमर्श'स्य नव शृंखला समारब्धा, अपितु 'संस्कृतवार्ता' इति त्रैमासिकं प्रारभ्य नियतां कालमर्यादां परिपालयता अधुनावधि अस्य सर्वेऽपि अङ्का यथाकालं प्रकाशिताः। 'संस्कृतवार्ता'याः सम्पादकीये आचार्यराधावल्लभस्य समुद्घोषो हर्षप्रकर्षकारको यत् पञ्चसु वर्षेषु शतं प्रायः संस्कृतसाहित्यभाण्डागारस्य गौरवग्रन्था विश्वजालपुटे निवेक्ष्यन्ते, पञ्चाशत्प्रायाणां च ई-पाठः सी.डी. द्वारेण सुलभायिष्यते।

सम्पादकीयान्ते शार्दूलविक्रीडितस्य मङ्गलपद्यद्वयं तस्य महच्चेतस औदार्यसूचकमस्ति। तदीयेप्सितच्छन्दोमुखेनैव वयमपि तेभ्यः समीहामहे—

**"राष्ट्रायामितभक्तिभावभरितत्वं कर्षकेषु दयाम्**
**आतङ्के निरतेष्वमन्दखरकर्मणां प्रयोगाश्रयम्।**
**भावत्की शुभकामना वदति ह्यौदार्यं भवच्चेतसः**
**वर्षं नूतनमेतदस्तु भवतामप्यार्त्तिनां शामकम्।।"**

डा० चन्द्रभूषणझाः, देहली



दिवङ्गतः डा. हिन्दकेसरी

## स्वतन्त्रभारतस्य प्रथमेऽहनि लब्धजन्मा विद्वत्केसरी दिवङ्गतः

संस्थानपरिसरप्राचार्येषु वरिष्ठः, प्रौढः व्याकरणविद्वान् हिन्दकेसरिमहोदयः २५-५-०९ तमे दिनाङ्के सायम् इहलोकं विहाय दिवं प्रयातः। एतस्य महोदयस्य आकस्मिकनिधनेन संस्कृतजगत् अपूरणीयां क्षतिमनुभवति। शोकाकुलितैः कुलपतिप्रमुखैः संस्थानपरिवारसदस्यैः मुख्यालये विभिन्नपरिसरेषु च शोकसभा आयोजिता, अश्रुपूरितः श्रद्धाञ्जलिः च अर्पितः। दिवङ्गतस्यात्मनः चिरशान्तिं, सन्तप्तस्य तस्य निजपरिवारस्य धैर्यं च सर्वशक्तः भगवान् प्रदद्यात् इति आशास्य संस्थानपरिवारपक्षतः कुलपतिमहोदयेन विलिखितः सन्देशः तत्परिवारं प्रति प्रहितः।

### दिवङ्गतविदुषः जीवनवृत्तम्

- १५-८-१९४७ दिनाङ्के उत्तरप्रदेशे फिरोजाबादजिलायां जन्म।
- पिता श्री मङ्गलसिंहः, माता श्रीमती रामश्रीः।
- प्रारम्भिकशिक्षा शिकोहाबादस्थ-संस्कृतपाठशालायाम्।
- वाराणस्यां १९६९ तमे वर्षे व्याकरणाचार्यपरीक्षा उत्तीर्णा।
- मेरठविश्वविद्यालयात् संस्कृते एम्.ए. पदवी प्राप्ता।
- १९७६ तमे वर्षे 'विद्यावारिधिः' इत्युपाधिः वाराणस्यां लब्धः।
- २३ जून् १९७३तमे दिनाङ्के श्रीमत्या अनसूयया सह परिणयः।
- अपत्यानि– तिस्त्रः पुत्र्यः, एकः पुत्रश्च।
- १९७६ तः १९८६ पर्यन्तं ऋषिकेशे महर्षिविद्यापीठे व्याख्यातृत्वेन अध्यापनम्।
- १९८० तमे वर्षे तिरुपतौ केन्द्रीयसंस्कृतविद्यापीठे व्याख्यातृपदमवाप्य संस्थानपरिवारे अन्तर्भावः।
- १९८३ तः १९८७ पर्यन्तं व्याख्यातृत्वेन कार्यम्।
- १९८७तमे वर्षे प्रवाचकत्वेन प्रोन्नतिः,
  १९९८ पर्यन्तं जयपुरपरिसरे सेवा।
- १९९८ तः २००४ पर्यन्तं गरलीपरिसरे प्राचार्यत्वम्।
- २००५ तः जयपुरपरिसरे प्राचार्यत्वम्।
- षण्णां शोधच्छात्राणां मार्गदर्शनम्।
- पञ्चाशदधिकशोधपत्राणां प्रस्तुतिः।
- विशिष्टा वाङ्मयसेवा–
  **मैत्रेयरक्षितविरचित-तन्त्रप्रदीप**नामकस्य व्याकरणग्रन्थस्य सम्पादनम्।
  वाक्यशुद्धिविवेचनात्मकस्य '**वाक्यविवेकः**' इत्यस्य रचना।
  भारती, स्वरमङ्गला-इत्यादिपत्रिकासम्पादनम्।
  विद्वद्गोष्ठीषु पण्डितपरिषदि च शास्त्रार्थविचारः।
- सदस्यतादिकम्–
  संस्थानस्य, इतरशैक्षिकसंस्थानां च विभिन्नासु उच्चसमितिषु सदस्यता। राजस्थानसंस्कृत-अकादम्याः उपाध्यक्षता।

**स्वभावः**

निराडम्बरः, यथार्थवक्ता, विनयशीलः, सरलस्वभावः शिष्यवत्सलः च।

मुख्यालयवार्ता

## अर्थसमितेः प्रबन्धमण्डलस्य च उपवेशनं समभूत्

रा.सं.संस्थानस्य अर्थसमितेः त्रयोदशम् उपवेशनं, प्रबन्ध-मण्डलस्य विंशम् उपवेशनं च २९-६-०९ तमे दिनाङ्के प्रवृत्तम्। तत्र निर्णीतांशेषु अधोनिर्दिष्टांशाः विशिष्टमुल्लेखम् अर्हन्ति।

- ☒ शोधविद्यार्थिनां कृते पाण्डुलिपिविज्ञानविषये अनुसन्धान-प्रविधिविषये च प्रशिक्षणकार्यशाला इतः परं प्रतिवर्षम् आयोज्येत।
- ☒ शृङ्गेरीपरिसरे राजीवगान्धि-स्मृतिव्याख्याननाम्ना एका अन्ताराष्ट्रिया व्याख्यानमाला प्रारब्धव्या।

## मुम्बय्यां गरल्यां च परिसरभवननिर्माणाय प्रयासः आरब्धः

- मानवसंसाधन-विकासमन्त्रालयेन मुम्बय्यां संस्थानस्य परिसरभवननिर्माणाय प्राथमिक-सम्भावितव्ययविवरणम् अनुसृत्य ९९५-लक्षरुप्यकाणां राशिः अनुमतः। तदनु भवननिर्माणमुद्दिश्य २९८-लक्षरुप्यकाणाम् अग्रिमराशिः केन्द्रीयलोकनिर्माणविभागे संस्थानेन समर्पितोऽस्ति।
- हिमाचलप्रदेशे गरल्यां संस्थानपरिसरभवननिर्माणाय १३२६ लक्षरुप्यकाणां राशिः मन्त्रालयेनानुमतः।

## प्राचार्याणाम् उपवेशनं सम्पन्नम्

०६-०५-०९ तमे दिनाङ्के संस्थानस्य परिसरप्राचार्याणाम् उपवेशनमेकं सम्पन्नम्। तत्र निर्णीताः प्रमुखाः विषयाः–

- ऐषमः अखिलभारतशास्त्रीयभाषणस्पर्धा-शलाकापरीक्षा युवमहोत्सवः च दिसम्बरमासे जयपुरपरिसरे भविता।
- संस्थानस्य विशिष्टकार्यक्रमाणां सम्भाविता वार्षिकसमयसारिणी कल्पिता।
- अनौपचारिक-शास्त्रशिक्षणकेन्द्रारम्भविषये चिन्तनं प्रवृत्तम्।
- पाण्डुलिपिविज्ञान-शोधप्रविधिप्रक्रिययोः विषये अग्रिमकार्यशाला हैदराबादस्थितायां संस्कृतपरिषदि भवेत्।
- संस्थानस्य भौतिकसम्पत्परिशीलनम्, आन्तरिकलेखापरिवीक्षा च अचिराद् भवेत्।

## आगामिनि मासत्रये कार्यक्रमाः

- **राष्ट्रिय-प्राकृतसङ्गोष्ठी** – २५ जुलाई तः २७ जुलाई २००९ जयपुरे
- **संस्कृतसप्ताहः** – ०२-८-०९ तः ०८-८-०९ समग्रदेशे
- **पाण्डुलिपिविज्ञानकार्यशाला** – १७-०८-०९ तः ६-९-०९ हैदराबादस्थितसंस्कृतपरिषदि
- **दीक्षान्तसमारोहः** – १२-९-०९ नवदेहल्याम्
- **बौद्धपरम्परायाः सार्वभौमः सन्देशः– पालिसाहित्यसन्दर्भे इति विषये अन्ताराष्ट्रियसङ्गोष्ठी** – २२ तः २४-९-०९

## अस्तङ्गतेऽपि सूर्ये कविः भास्करः चिरं प्राकाशत



कवये भास्कराचार्याय श्रद्धाञ्जलिं समर्पयन् कुलपतिः राधावल्लभत्रिपाठी

नूतनसंवत्सरस्य (१९३१ शकाब्दस्य) पूर्वसन्ध्यायां राष्ट्रियसंस्कृतसंस्थानेन नवदेहल्यां राष्ट्रिय-सामाजिक-सुरक्षा-अनुसन्धान-प्रशिक्षण-अकादम्याः सभागारे आयोजिते कार्यक्रमे कविर्भास्करः स्फुटं प्रकाशते स्म।

राष्ट्रियसंस्कृतसंस्थानेन आधुनिकसंस्कृतलोके कवितल्लजत्वेन प्रथितयशसे दिवङ्गतकवये भास्कराचार्यत्रिपाठिवर्याय श्रद्धाञ्जलिसमर्पणाय 'कविभास्करी' इति अखिलभारतीयं संस्कृतकविसम्मेलनम् आयोजितम् आसीत्। संस्थानकुलपतेः आचार्यराधावल्लभत्रिपाठिनः अध्यक्षतायां सम्पन्ने एतस्मिन् कार्यक्रमे मुख्यातिथिरूपेण तिरुपतिस्थ-रा.सं.विश्वविद्यालयस्य कुलपतिः आचार्यः हरेकृष्णशतपथी, सारस्वतातिथिरूपेण आचार्यः अभिराजराजेन्द्रमिश्रः, विशिष्टातिथिरूपेण आचार्यः रेवाप्रसादद्विवेदिमहोदयः च समुपस्थाय स्वीयाभिः कविताभिः कवेः भास्कराचार्यत्रिपाठिवर्यस्य कवितासौन्दर्यं, वैदुष्यम्, आकर्षणीयव्यक्तित्वं च संस्मार्य श्रद्धाञ्जलिं समार्पयन्। कविसमवाये विशेषतः समाहूतेषु विद्वत्सु काशीतः डा. शिवजी उपाध्यायः, प्रयागतः डा. जगन्नाथपाठकः, डा. जनार्दनपाण्डे 'मणिः', डा. हरिदत्तशर्मा, डा. बनमाली विश्वालः, अहमदाबादतः डा. हर्षदेवमाधवः, लखनऊतः डा. रामलखनपाण्डेयः, डा. ओम्प्रकाशपाण्डेयः, भोपालतः डा. निलिम्पत्रिपाठी, केरलराज्यात् डा. मुरलीमाधवः, पञ्जाबतः डा. इन्द्रमोहनसिंहः, कोलकातातः डा. सीतानाथ-आचार्यः, भुवनेश्वरतः डा. प्रफुल्लकुमारमिश्रः, जम्मूतः डा. सतीशकुमारः, हिमाचलतः डा. सुरेशगौतमः, जयपुरतः डा. कलानाथशास्त्री, देहलीस्थाः - डा. रमाकान्तशुक्लः, डा. रामदेवझाः, डा. भागीरथीनन्दः इतीमे समागत्य कवितापाठेन भास्कराचार्यस्य संस्मरणमकुर्वन्। श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य आचार्यः इच्छारामद्विवेदी भास्कराचार्यसाहचर्यजनित-मधुरानुभूतिवर्णनपुरस्सरं काव्यमयशैल्या सभां सञ्चालयन् उपस्थितान् सभ्यान् रञ्जितवान्। कार्यक्रमे अध्यक्षभाषणं कुर्वता संस्थानकुलपतिना आधुनिकसंस्कृत- कविपरम्परायाः प्रोत्साहनाय संस्कृतकविसम्मेलनादिविविधाः कार्यक्रमाः असकृदायोजनीयाः इत्यभिप्रायः प्रकटितः। तेनेदमपि घोषितं यत् आगामिनि विश्वसंस्कृतसम्मेलने रा. सं.संस्थानपक्षतः अन्ताराष्ट्रिय संस्कृतकविसमवाय- स्यायोजनाय समुचितः प्रयासः विधास्यते इति। सन्दर्भेऽस्मिन्, आचार्यश्रीनिवासरथमहोदयानां कवितारचनानां ध्वनिसान्द्रमुद्रिकालोकायार्पिता। अपराह्णे सार्धचतुर्वादने समारब्धं कार्यक्रमं रात्रौ नववादनं यावत् श्रोतृवर्गः निर्निमेषं वीक्षते स्म। सूर्यास्तमयमपि अविगणय्य देहल्याः दूरदूरप्रदेशेभ्यः समागताः सहृदयाः कार्यक्रमस्य आन्तं यावदुपस्थिताः आसन्। अस्तङ्गतेऽपि सूर्ये कविर्भास्करः सर्वेषां मनःपटले चिरं यावत् प्राकाशत।




वामतः कलानाथशास्त्री, रेवाप्रसादद्विवेदी, हरेकृष्णशतपथी, राधावल्लभत्रिपाठी, अभिराजराजेन्द्रमिश्रः च

## साहित्यशास्त्र-पाठसंरचनाकार्ये प्रवृत्तः विद्वद्गणः



विद्वद्गणं सम्बोधयन् राधावल्लभत्रिपाठी चित्रे दृश्यते सी.आर्.के. मूर्तिः, रत्नमोहनझाः च

नवदेहल्यां छत्तरपुरस्थे अध्यात्मसाधनाकेन्द्रे ०२-५-०९ तः ०८-०५-०९ पर्यन्तं रा.सं. संस्थानेन दूरस्थशिक्षापाठ्यक्रमस्य साहित्यपाठसंरचनाकार्यशाला आयोजिता। तत्र प्राक्शास्त्रिद्वितीयवर्षस्य शास्त्रिद्वितीयतृतीयवर्षयोः आचार्यद्वितीयवर्षस्य च साहित्यपाठानां बिन्दुशः रचना निर्धारिता यदाधारेण अग्रे लेखकाः पाठं लिखेयुः। कार्यक्रमस्य उद्घाटनावसरे अध्यक्षपदं विभूषयता कुलपतिना आचार्येण राधावल्लभत्रिपाठिमहोदयेन प्रोक्तं यत् संस्कृतस्य, संस्कृत-सम्बद्धानां विविधक्रियाकलापानां च सर्वाङ्गीणविकासाय संस्थानेन नियमिताध्ययनप्रणाल्याः, पत्राचारपाठ्यक्रमस्य, दूरस्थशिक्षामाध्यमस्य, अनौपचारिकसंस्कृतशिक्षाप्रणाल्याः च सश्रद्ध-मनुष्ठानं क्रियते; सर्वस्याः अपि प्रणाल्याः तत्तत्स्थाने स्वीयं वैशिष्ट्यं विद्यते चेति। आधुनिके काले दूरस्थशिक्षायाः समुन्नयनस्य आवश्यकतामुद्दिश्य कुलपतिवर्येण विस्तरेण विचारः प्रस्तुतः। वैद्यकीय-तन्त्रज्ञानादि-क्षेत्रेषु दूर-सङ्गोष्ठी (Tele-conference) इत्यादिमाध्यमेन विषयविशेषज्ञस्य सदुपयोगं सुदूरे विद्यमाना अपि प्राप्नुवन्तीत्याद्युदाहरणपुरस्सरं कुलपतिवर्यः न्यगादीत् यत् संस्कृताध्ययनं प्रोत्साहयितुं दूरस्थशिक्षाद्वारा आधुनिकसञ्चारमाध्यमद्वारा च समधिकतरं प्रयासो विधेयः इति। कार्यशालायाः प्रशिक्षकः प्रो. सी.आर्.के.मूर्तिः (इ.गा.रा.मु.वि.वि.) 'इदानीन्तनकाले दूरस्थशिक्षायाः उपादेयता-अपेक्षितसिद्धता' इति विषयमधिकृत्य भाषितवान्। कार्यक्रमादौ श्रीमती डा. नागरत्ना-हेगडे सरस्वतीवन्दनात्मकं गीतं प्रास्तौत्। कू. वेङ्कटेशमूर्तिः स्वागतं व्याहरत्। अन्ते डा. रत्नमोहनझाः धन्यवादं व्यज्ञापयत्। सप्ताहात्मिकायामस्यां कार्यशालायाम्-विद्वान् गुण्डमि-गणपय्यहोल्लः, डा. रामकुमारशर्मा, डा. नागरत्ना हेगडे, डा. विश्रामतिवारी, डा. राघवकुमारझाः, डा. वि.एन्. दामोदर-उण्णिः, विदुषी शरावती भट्टः, डा. सूर्यमणिरथः, डा. राघवेन्द्रभट्टः, डा. वसन्तकुमारमिश्रः, विद्वान् अमृतेशः, विद्वान् गजाननभट्टः, विद्वान् लक्ष्मीनारायणभट्टः, डा. उमाकान्तचतुर्वेदी, डा. नारायणदाशः, डा. तन्मयकुमारभट्टाचार्यः, डा. सुमनकुमारझाः, डा. उपेन्द्ररावः च उपस्थिताः आसन्। एते विद्वांसः प्रथमदिनत्रये दूरस्थशिक्षाप्रणालीसम्बद्धं प्रशिक्षणं प्राप्य अनन्तरं पञ्चदिनानि यावत् परस्परं विचिन्त्य विविधविषयेषु पाठसंरचनाः (पाठबिन्दुसङ्कलनम्) अकुर्वन्।

## कुलपतेः दैनन्दिनी

| | |
|---|---|
| ०१-०४-०९ | टोक्यो-विश्वविद्यालयस्य आचार्य-मिनोरुहरमहोदयेन प्राप्तपद्मभूषणबिरुदम् उपलक्ष्य तस्य सम्माननार्थं भारत-अन्ताराष्ट्रियकेन्द्रे (IIC) आयोजितसभायां समुपस्थितिः। |
| ०८-४-०९ | 'संस्कृतवाङ्मयस्य कृते क्षेमेन्द्रस्य योगदानम्' इति विषयमधिकृत्य हैदराबादस्थया संस्कृतपरिषदा समायोजितायाः राष्ट्रियसङ्गोष्ठ्याः उद्घाटनकार्यक्रमे विशिष्टातिथित्वेन प्रभाषणम्। |
| ०९-४-०९ | महापण्डित-राहुल-साङ्कृत्यायन-प्रतिष्ठानेन नवदेहल्यां गान्धिशान्तिन्यासे आयोजिते कार्यक्रमे राहुलसाङ्कृत्यायन-स्मृतिव्याख्यानम्। |
| १०तः१२-४-०९ | भोपाले भारतभवने प्रवृत्ते विमर्शकसम्मेलने भाषणम्। |
| २१-४-०९ | पुण्यपत्तने डेक्कन्-महाविद्यालयस्य संस्कृतशब्दकोषपरियोजनायाः पुनरीक्षणसमितेः उपवेशने भागग्रहणम्। |
| २२-४-०९ | देहल्यां श्रीला.ब.शा.रा.सं.विद्यापीठस्य कार्यपरिषदः अधिवेशने उपस्थितिः। |
| २५तः२६-४-०९ | 'भारते शास्त्रीयविषयाणाम् अध्ययनस्य भविष्यम्' इति विषये आचार्य-शेल्डान्पोलाक् - इत्यनेन शिमलायां भारतीय-उच्चाध्ययनसंस्थायां (IIAS) आयोजितायां कार्यशालायां भागग्रहणम्। |
| २८-४-०९ | कोच्चिनगरे प्रवृत्ते अखिलभारत-संस्कृतविश्वविद्यालय-कुलपतिसम्मेलने आध्यक्ष्यनिर्वहणम्। श्रीशङ्करजयन्तीम् उपलक्ष्य चिन्मय-अन्ताराष्ट्रिय-न्यास (CIF) शोधसंस्थाने आयोजितस्य श्रीशङ्करकाव्यसपर्याकार्यक्रमे आध्यक्ष्यम्। |
| ०१-५-०९ | संस्थानमुख्यालये प्रवृत्ते केन्द्रीयशोधमण्डलस्य उपवेशने आध्यक्ष्यम्। |
| ६-५-०९ | संस्थानमुख्यालये प्राचार्यसमावेशस्य अध्यक्षता। |
| १०-५-०९ | देहल्यां भोगीलाललहेरचन्द-भारतीयविद्याशोधसंस्थानेन (BLII) जैनपरम्परायां जीवनपद्धतिः इति विषये आयोजितायाः राष्ट्रियसङ्गोष्ठ्याः उद्घाटनोत्सवे विशिष्टातिथित्वम्। |
| २०-५-०९ | देहल्यां टैगोरगार्डनस्थित-केन्द्रीयविद्यालये प्रबन्धमण्डलस्य उपवेशने अध्यक्षतानिर्वहणम्। |
| २३-५-०९ | कोलकातायां संस्कृतसाहित्यपरिषदा आयोजितसङ्गोष्ठ्याः उद्घाटनभाषणम्। |
| २५तः२६-५-०९ | शृङ्गेर्यां रा.सं.संस्थानस्य राष्ट्रियनाट्यविद्यालयस्य च संयुक्ततत्त्वावधाने समायोजितायाः नाट्यकार्यशालायाः उद्घाटनम्। |
| ३१-५-०९ | नवदेहल्यां जैनदर्शनशोधसंस्थानेन आयोजिते कार्यक्रमे विशिष्टातिथित्वम्। |
| २-६-०९ | श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कार्यपरिषदः उपवेशने भागग्रहणम्। |
| ३-६-०९ | देहल्यां जामिया-मिलिया-इस्लामिया-विश्वविद्यालये विश्वविद्यालय-अनुदान-आयोगेन समायोजिते प्रादेशिक-कुलपतिसम्मेलने समुपस्थितिः। |
| ६-६-०९ | शब्दकल्पद्रुम-परियोजनायाः पुनरीक्षणसमितिसमावेशे अध्यक्षता। |
| ८-६-०९ | संस्थानाध्यक्षेण माननीय-मानवसंसाधनविकासमन्त्रिणा सह संस्थानप्रगतिविषये संवादः। |
| १०-६-०९ | पालिविषयकान्ताराष्ट्रियसम्मेलनायोजनसमितेः उपवेशने आध्यक्ष्यम्। |
| १२-६-०९ | भारतीय-सांस्कृतिक-अनुसन्धान-परिषदः (ICCR) प्रधाननिदेशकेन सह उपवेशनम्। |
| १४-६-०९ | कर्णाटकेषु श्रवणबेलगोला इत्यत्र बाहुबलि-प्राकृतविद्यापीठस्य चतुर्दशे दीक्षान्तसमारोहे दीक्षान्त- भाषणम्। |
| १७-६-०९ | प्रकाशनसमितेः उपवेशने आध्यक्ष्यम्। |
| २७-६-०९ | महर्षि-पाणिनिसंस्कृतविश्वविद्यालयेन उज्जयिन्यां समायोजित-सम्मेलनस्य समापनोत्सवे व्याख्यानम्। |
| २९-६-०९ | संस्थानमुख्यालये प्रबन्धमण्डलस्य अर्थसमितेः च उपवेशने आध्यक्ष्यम्। |
| ३०-६-०९ | संस्कृतविमर्शस्य सम्पादकमण्डलस्य उपवेशने अध्यक्षता। |



पुण्यपत्तने भ.प्रा.वि.सं.मन्दिरे शाब्दबोधविषयिणीं वाक्यार्थसभां सम्बोधयन् कुलपतिः

## प्रोन्नताः अध्यापकाः

चयनसमितेः प्रस्तुतिं, विश्वविद्यालय-अनुदान-आयोगस्य आख्यां च अनुसृत्य अधोनिर्दिष्टानां प्रवाचकानाम् आचार्यरूपेण प्रोन्नतिः (वृत्ति-प्रोन्नति-योजनायां) रा.सं.संस्थानस्य प्रबन्धमण्डलेन अनुमता।

**१. शिक्षाशास्त्रे**

| | |
|---|---|
| डा. फतेहसिंहः | डा. त्रिभुवनकान्तशर्मा |
| डा. लोकमान्यमिश्रः | डा. सुदेशकुमारशर्मा |
| डा. एम्. चन्द्रशेखरः | डा. सन्तोषमित्तल |
| डा. सोहनलालपाण्डेयः | |

**२. साहित्ये**

| | |
|---|---|
| डा. शैलकुमारी मिश्रा | डा. बटोही झाः |
| डा. के.पि.केशवन् | डा. रामलखनपाण्डेयः |
| डा. विद्यानन्दझाः | |

**३. व्याकरणे**

| | |
|---|---|
| डा. सुरेन्द्रपाठकः | डा. एच्.के. महापात्रः |
| डा. वि.के. शैलजा | डा. सि.एल्. सिसिली |
| डा. प्रकाशचन्द्रः | डा. पी.जी.श्रीनिवासन् |

**४. पुराणेतिहासे**

डा. फकीरमोहनपण्डा

**५. बौद्धदर्शने**

डा. विजयकुमारजैनः

**६. धर्मशास्त्रे**

डा. अतुलकुमारनन्दः

डा. भगवती सुदेशः

डा. खगेश्वरमिश्रः

**७. हिन्द्याम्**

डा. शिशिरकुमारपाण्डेयः

**अभिनन्दनम्**

## नवनियुक्तिः

गतेषु त्रिषु मासेषु नवनियुक्तिं प्राप्य संस्थानपरिवारे सम्मिलितान् एतान् अभिनन्दति 'संस्कृतवार्ता'

**व्याख्यातृपदे**

| नाम | शास्त्रम् | परिसरः |
|---|---|---|
| श्रीकृपाशङ्करशर्मा | साहित्यम् | पुरी |
| श्री एस्.वेङ्कटेशताताचार्यः | मीमांसा | शृङ्गेरी |
| श्री ओ.आर्.विजयराघवन् | न्यायम् | शृङ्गेरी |

**सहायकग्रन्थपालपदे**

| | |
|---|---|
| कु. मीना कुमारी | जयपुरपरिसरे |
| श्रीश्यामसुन्दरपाण्डे | गङ्गानाथझापरिसरे |

**लेखापालपदे**

| | |
|---|---|
| श्री श्रीनिवासशास्त्री | मुख्यालये |

**कनिष्ठलिपिकपदे**

| | |
|---|---|
| श्री वामदेवमिश्रः | मुम्बई (तदर्थनियुक्तिः) |

## मुख्यालये सङ्गोष्ठी

३१.०३.०९तमे दिनाङ्के संस्थानमुख्यालये 'पाश्चात्त्यदेशेषु संस्कृताध्ययनम्' इति विषये काचित् सङ्गोष्ठी सम्पन्ना। कुलपति-महोदयस्य आध्यक्ष्ये प्रवृत्तायाम् अस्यां सङ्गोष्ठ्यां मुख्यवक्तृरूपेण न्यूयार्कविश्वविद्यालयस्य आचार्यः शेल्डान् पोलोकमहोदयः समाहूत आसीत्। भारते वाराणस्याम् अन्यत्र च संस्कृताध्ययनं कृत्वा विश्वे अन्यान्यदेशेषु अध्यापितवता शैक्षिकप्रवासं च कुर्वता तेन पाश्चात्त्येषु वर्धमाना संस्कृताध्ययनासक्तिः वर्णिता। संस्कृतवाङ्मये अनुसन्धानस्य का दिक् सम्प्रति विदेशेषु वर्तत इति विशेषेण निरूपयन् सः अवदत् यत् संस्कृतं न कस्यचिदेकस्य समुदायस्य देशस्य वा सम्बद्धा अपि तु एषा भाषा तदन्तर्गतशास्त्राणि च समग्रमानवसमुदायस्य समुन्नयनाय विद्यत इति। देशे विदेशेषु च संस्कृताध्यापनक्षेत्रे प्राप्तानुभवः संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः स्वीयाध्यक्षभाषणे 'संस्कृता-ध्ययनाध्यापन-शोधादिकार्येषु कार्यरतानां सूक्ष्मदृष्टिः, सदुद्देशपूरिता कार्यसरणिः, गहनं चिन्तनं च भवतु' इति अवदत्। विश्वस्तरे संस्कृत-सम्बद्धयोजनानां क्रियान्वयनाय संस्थानं यथोचितं प्रयासं विधास्यति इति च अभिप्रायं कुलपतिः प्राकटयत्। कार्यक्रमे देहलीस्थाः अन्यस्माच्च समागताः विद्वांसः श्रोतारः उपस्थिताः आसन्।

## प्रोन्नताः अधिकारिणः / कर्मचारिणः

| नाम | नूतनं पदम् | परिसरः |
|---|---|---|
| श्री दीवानचन्दः | उपकुलसचिवः (प्रशा०) | मुख्यालयः |
| डा. रमेशचन्द्रहोता | सहा०कुलसचिवः (पत्रा.) | मुख्यालयः |
| श्री पी.एन्.वत्सः | ,, (शो.प्र.) | ,, |
| श्रीमती वि.एस्.सीतालक्ष्मीः | अनुभागाधिकारिणी | मुम्बई |
| श्री सोहनपालः | अनुभागाधिकारी | मुख्यालयः |
| श्री राजेन्द्रमोहनः | ,, | ,, |
| श्री राजिन्दरसिंहबीजी | ,, | ,, |
| श्री मानसिंहबिष्टः | ,, | ,, |
| श्री पी.के. आनन्दः | ,, | ,, |
| श्रीमती मीना भसीन् | अनुभागाधिकारिणी | ,, |
| श्री आई.के. गुप्तः | अनुभागाधिकारी | ,, |
| श्री विनोदकुमार अरोरा | ,, | |
| श्री वि.एम्.शर्मा | का. सहायकः | ,, |
| श्री श्रीपतिरायः | का. सहायकः | लखनऊ |
| श्री एम.के. शर्मा | ,, | जयपुरम् |
| श्रीमती पी.बी.राधा | का. सहायिका | गुरुवायूरु |
| श्री बिशन्दासः | का. सहायकः | मुख्यालयः |
| श्री आर्.के. कौशिकः | ,, | ,, |
| श्रीमती कुशलमल्होत्रा | का. सहायिका | ,, |

अरणीमन्थने जातु यो विरन्तुं न चेष्टते।
स एव लभते वह्निमेवं सिद्धेरपि प्रथा।।
बुद्धचरितम्, २६, ६४

# प्रवृत्ता राष्ट्रिय-संस्कृतनाट्यकार्यशाला

शृङ्गेर्यां



शकुन्तलायै भावपूर्णं सौप्रस्थानिकम्

त्रिसप्ताहावधिका राष्ट्रिय-संस्कृतनाट्यकार्यशाला शृङ्गेरीपरिसरे सम्पन्ना। २५-५-२००९ तमे दिनाङ्के आरब्धा कार्यशाला संस्थानकुलपतिना आचार्य-राधावल्लभत्रिपाठिमहाभागेन समुद्घाटिता। इयं कार्यशाला राष्ट्रियसंस्कृतसंस्थानेन, भारतशासनस्य संस्कृतिमन्त्रालयाधीनराष्ट्रियनाट्यशालया च सम्भूय समायोजिता आसीत्। उद्घाटनोत्सवे संस्थानस्य कुलपतिवर्येण आचार्यराधावल्लभत्रिपाठिना सह आचार्यः के.एस्.राजेन्द्रन् (रा.ना.शा), भरतनाट्यप्रवीणा अञ्जनाराजन्, संस्कृतविद्वान् रङ्गमञ्चविशेषज्ञः डा. बलदेवानन्दसागरः, भरतनाट्यविशारदः श्री लोकेशभारद्वाजः च विशेषेण समुपस्थिता आसन्। विभिन्नराज्येभ्यः संस्थानपरिसरेभ्यः च समागताः भागग्राहिणः (२४ छात्राः, तन्मार्गदर्शकाः ८ अध्यापकाः परिसरसदस्याः च) सभाम् अलञ्चक्रुः। उद्घाटनकार्यक्रमे श्रीमता राजेन्द्रवर्येण कार्यशालायाः स्वरूपम् उद्देश्यं च विवृतम्। परिसरप्राचार्यः रामानुजदेवनाथः स्वागत-वचांसि व्याहरत्। आचार्यः सच्चिदानन्दवर्यः धन्यवादं व्याहरत्। नाट्यशास्त्रे कृतभूरिपरिश्रमः कुलपतिवर्यः राधावल्लभमहोदयः २५ दिनाङ्के, २६ दिनाङ्के च नाट्यशास्त्रस्य विविधान् अंशान् अधिकृत्य दृश्यप्रस्तुतिपुरस्सरं विद्वत्पूर्णं प्रबोधनमकरोत्। कूडियाट्टं-गुरुः श्री मार्गिमधुः, इन्दुमधुः तत्सहयोगिनश्च कूडियाट्टाधारेण प्रशिक्षणं प्रदत्तवन्तः। २७तमे दिनाङ्के श्रीमार्गिमधुना कैलासोद्धरणकथामाश्रित्य कृतेन कूडियाट्टनृत्यप्रदर्शनेन द्रष्टृवर्गः आनन्दितः समभवत्। २८ दिनाङ्के डा. इन्दुः, महिलाभिरेव अनुष्ठीयमानां नाङ्गियर्कूट्टुनामिकां कलां प्रादर्शयत्। २९ दिनाङ्के डा. बलदेवानन्दसागरमहोदयस्य मार्गदर्शने अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य वाचिकाभिनयः प्रशिक्षार्थिभिः कृतः। ३० तमे दिनाङ्के रङ्गकर्मसम्बद्धक्रियाविशेषमधिकृत्य, शारीरिकमुद्राविशेषानधिकृत्य च अभ्यासः कारितः। श्रीमत्याः अञ्जनाराजन् इत्यस्याः निर्देशने भागग्राहिभिः मालविकाग्निमित्रस्य विविधदृश्यानां प्रस्तुतेः अभ्यासः कृतः। परेद्यवि अञ्जनामहोदयया भरतनाट्यस्य विविधभङ्गिमाः बोधिताः। जून-मासस्य द्वितीये तृतीये च अहनि श्रीरघुनन्दन-लोकेशभारद्वाजयोः प्रशिक्षकत्वे विविधानि कलाकौशलानि छात्राः आत्मसात्कृतवन्तः। भारते नवदशाधिकवर्षाणि कृतकार्यस्य भरतनाट्यपटोः, श्री जस्टिन् एम्.सि. चार्तिः इत्येतस्य मार्गदर्शने छात्राः स्वप्नवासवदत्तस्य स्वप्नाङ्कस्य मञ्चनम् अकुर्वन्। षष्ठदिनाङ्के श्री रघुनन्दनः नाटकस्य दृश्यसिद्धता कथं करणीया इत्यस्मिन् विषये छात्रान् प्राबोधयत्। ८ दिनाङ्के आयोजित-शैक्षिक-भक्तियात्रावसरे प्रशिक्षकाः राजेन्द्रप्रभृतयः 'प्रकृतिसौन्दर्यवीक्षणं, रङ्गमञ्चसज्जतायां तदुपयोगश्च' इति विषयमधिकृत्य प्रायोगिकरूपेण प्रशिक्षणार्थिनः उद्बोधितवन्तः। जून्-दशमदिनाङ्के डा. पी.कण्णन्महोदयस्य मार्गदर्शने भागग्राहिभिः छात्रैः दूतवाक्यात् उद्धृतस्य श्रीकृष्णदुर्योधनयोः संवादस्य अभिनयः प्रादर्शि। ११ दिनाङ्के श्री कावालं-नारायणपणिक्करः (अन्ताराष्ट्रियस्तरे विख्यातः कथक्कलीकलाभिज्ञः), डा. उदयनवाजपेयी (विख्यातः कविः रङ्गमञ्चविमर्शकश्च), डा. सङ्गीता गुण्डिचा च प्रशिक्षकरूपेण वर्गे सम्मिलिता अभूवन्। नारायणपणिक्करमहोदयेन गीत-ताल-लय-विषये स्वसहयोगिदलेन सह प्रायोगिकं प्रशिक्षणं प्रदत्तम्। तस्मिन्नहनि सायं कण्णन्महाशयेन प्रदर्शितं कथक्कलीनृत्यं सर्वेषां मनमोहकम् आसीत्। द्वादशे दिनाङ्के उदयनवाजपेयिमहोदयेन कृतेन नाट्यशास्त्रविषयकेन व्याख्यानेन तत्पश्चात् प्रवर्तितेन नाट्यमञ्चनसम्बद्धेन संवादेन च छात्राः उपकृताः अभवन्। एतस्यां प्रशिक्षणकार्यशालायां सप्ताहत्रयं यावत् देशस्य विभिन्नभागेभ्यः समायातैः संस्थानपरिसराणां २४ छात्रैः सह तन्मार्गदर्शकाः अध्यापकाः - डा. जनार्दनप्रसादपाण्डे 'मणिः' (इलाहाबाद), डा. राघवेन्द्रभट्टः (शृङ्गेरी) डा. विश्वरञ्जनपतिः (पुरी), डा. वेङ्कटरमणभट्टः (गुरुवायूरु), मीना सक्करवाल (जयपुरम्) इत्येते समुपस्थिता आसन्। आवासीयकार्यशालायाः अस्याः व्यवस्थादिसंयोजकत्वेन परिसरीयाचार्यः ए.पि. सच्चिदानन्दः, अतिरिक्तसंयोजकत्वेन च डा. सोमनाथसाहुः, डा. गणेश टि.पण्डितः च सततम् अयतन्त।

१३-६-०९ दिनाङ्के सायं ६.३० वादने नाट्यकार्यशालायाः समापनसभा परिसरप्राचार्यस्य रामानुजदेवनाथमहोदयस्य आध्यक्ष्ये प्रवृत्ता। संस्थानस्य प्र.कुलसचिवः श्री चन्दनसिंहकनियालः कार्यक्रमे समुपस्थाय सम्मान्य-कुलपतिवर्यस्य सन्देशं संश्राव्य कार्यक्रमसाफल्याय कारणीभूतेभ्यः राष्ट्रिय-नाट्यशालायाः अधिकारिभ्यः विशिष्य डा. अनुराधाकपूर (निदेशिका, रा.ना.शा), आचार्यः के.एस्.राजेन्द्रन् (रा.ना.शा) इत्यनयोः कृते, अन्येभ्यश्च प्रशिक्षकेभ्यः कृतज्ञतां न्यवेदयत्। प्रसङ्गेऽस्मिन् डा. शुक्लामुखर्जी (परि. अधिकारिणी) नाट्यकार्यशालायाः सफलायोजनम् अभिलक्ष्य परिसरसदस्यान् अभिनन्दितवती। ततः पूर्वं कार्यशालायाः निदेशक-प्रशिक्षकः के.एस्.राजेन्द्रवर्यः कार्यशालायाः वृत्तं संक्षेपेण प्रास्तौत्। परिसरप्राचार्येण श्रीफलोत्तरीयादिभिः अतिथयः सत्कृताः। पश्चात् राजेन्द्रवर्यस्य निदेशने कार्यशालाभागग्राहिभिः प्रस्तुतेन अभिज्ञानशाकुन्तलस्य चतुर्थाङ्केन सप्ताहत्रयव्यापी कार्यक्रमः सम्पन्नतामगात्।



नाट्यशालायां प्रबोधयन् के.एस्. राजेन्द्रन्

## संस्कृतशिक्षकप्रशिक्षणवर्गाः सम्पन्नाः

संस्कृतमाध्यमेन संस्कृतशिक्षणकौशलं भाषादक्षतां च वर्धयितुम् एकविंशतिदिनात्मकाः आवासीयाः संस्कृतशिक्षकप्रशिक्षणवर्गाः राष्ट्रियसंस्कृतसंस्थानेन सङ्कल्पिताः आसन्। तेषु वर्गेषु भागं ग्रहीतु-मुत्सुकानां चयनार्थम् समग्रदेशे आहत्य १७ स्थानेषु प्रशिक्षणपूर्वपरीक्षणं च आयोजितम् आसीत्। प्रशिक्षणपूर्वपरीक्षणे अधोनिर्दिष्टरीत्या तत्तत्स्थानेषु जनाः उपस्थाय प्रशिक्षणवर्गे भागं ग्रहीतुमर्हाः घोषिताः।

| | उपस्थिताः | उत्तीर्णाः |
|---|---|---|
| गुरुवायूरु | २७ | १८ |
| शृङ्गेरी | ५५ | ३१ |
| बेङ्गलूरु | ११ | ०८ |
| भोपालम् | ५९ | २८ |
| मुम्बई | १९ | ०४ |
| जयपुरम् | ८९ | २३ |
| गरली | २८ | १८ |
| जम्मू | ४९ | २९ |
| लखनऊ | १५३ | ४९ |
| इलाहाबाद | ६० | १८ |
| कोलकाता | १८१ | ३६ |
| पुरी | १०० | ६० |
| गुवाहटी | ७१ | ३२ |
| मुझफरपुरम् | ४९ | ०९ |
| अहमदाबाद् | ३२ | १३ |
| हैदराबाद् | ११ | ०६ |
| देहली | ५१ | ११ |
| **आहत्य संख्या** | **१०४५** | **३९३** |



उत्तीर्णेभ्यः प्रशिक्षणवर्गाः चतुर्षु स्थानेषु आयोजिताः। तद्विषयकं वृत्तमिह अवलोक्यताम्–




वर्गस्योद्घाटने आशीर्वचनं प्रयच्छन्तः श्री दण्डिस्वामि-दामोदराश्रमपादाः, तन्मयकुमारभट्टाचार्यः, (वामतः) नारायणदाशः (सर्वदक्षिणतः)

## १११ जनाः प्रशिक्षिताः कोलकातायाम् आद्यापीठे

विगते 'मई'मासि एकोनत्रिंशत्तमे दिनाङ्के दक्षिणेश्वर-रामकृष्ण-सङ्घे, आद्यापीठे रा.सं.संस्थानेन आयोजितस्य एकविंशतिदिवसीयावासीयसंस्कृतशिक्षक-प्रशिक्षणवर्गस्य उद्घाटनानुष्ठानं सुसम्पन्नमभवत्। वैदिकमङ्गलाचरणेन सभारम्भो जातः। तदनु प्रदीपज्वालनं, माल्यार्पणं, सभ्यानां वरणं, स्वागतभाषणञ्चेत्यादीनि कृत्यानि सुष्ठु सम्पन्नानि समभवन्। उद्घाटनानुष्ठानमिदं दक्षिणेश्वर-रामकृष्ण-सङ्घस्य सहाध्यक्षाणां राष्ट्रपतिसम्मानादिभिः समर्चितानां नवसु शास्त्रेषु तलस्पर्शिपाण्डित्यं साधितवतां दण्डिस्वामिदामोदर-आश्रमपादानां साभापत्येन प्राचलत्। विशिष्टातिथिपदं समलङ्करोत् दक्षिणेश्वर- रामकृष्णसङ्घस्य सङ्घनेत्री, मणिकुन्तला-संस्कृतमहाविद्यालयाध्यक्षा ब्रह्मचारिणी दीपादेवीमहोदया। प्रशिक्षकप्रतिनिधिरूपेण सभां समबोधयत् नरेन्द्रपुरस्थ-स्वशासित-रामकृष्ण-मिशन्-आवासीय-महाविद्यालयस्य संस्कृतविभागाध्यक्षः डॉ. नारायणदाशमहोदयः। सभापतिमहाभागाः अद्यत्वे संस्कृतज्ञानां संस्कृतशिक्षकाणाञ्च भूमिका कथं स्यात्, दक्षिणेश्वर-रामकृष्ण-सङ्घस्य संस्कृतशिक्षाविस्तारे च कियदवदानमेतत्सर्वं विस्तरशः संस्कृतभाषया समुपस्थाप्य वर्गस्य निर्विघ्नपरिसमाप्त्यर्थं लक्ष्यपूर्तये च जगज्जननीम् आद्यादेवीं प्रार्थयन्त। सङ्घनेत्री ब्र. दीपादेवी वर्गस्य साफल्यं कामयमाना वर्गार्थिभ्यः स्वादिष्टभोजनादि-व्यवस्थां प्रतिश्रुतवती। डॉ. नारायणदाशमहोदयेन प्रशिक्षार्थिनो वर्गानुशासनविषये विशेषेण सम्बोधिताः। समग्रां सभां समचालयत् प्र. संयोजकः अध्यापकः तन्मय-कुमार-भट्टाचार्यः। प्रशिक्षणवर्गेऽस्मिन् चतुर्भ्यः प्रान्तेभ्यः १११ प्रशिक्षार्थिनो भागमनयन्। सप्तभिः शैक्षणिककालांशैश्चतुर्भि-श्चानौपचारिक-कालांशैः वर्गदिनचरी सज्जीकृता आसीत्। स्तरदृष्ट्या प्रशिक्षार्थिनः पुनः रामकृष्ण-विवेकानन्द-विद्यासागर-सारदादिभिः गणैः संविभक्ताश्चासन्। आधुनिकसाधनानि अपि प्रयुज्य कृतं पाठनं लाभदायकं समाकर्षकञ्चासीत्। जून्मासस्य सप्तदशे दिनाङ्के लिखितपरीक्षा जाता, तदनु मौखिकी परीक्षा समारब्धा। मौखिकी परीक्षा एकादशवादने आरब्धा (दिवा), रात्रौ त्रिवादने समाप्तिं गता। दशभिः प्रशिक्षकैः प्रशिक्षणकार्यं समचाल्यत। अष्टौ व्यवस्थापका निष्ठया व्यवस्थाकार्यं समपादयन्। शिक्षार्थिनः सोत्साहं वर्गे उपस्थाय शिक्षणकौशल- भाषादक्षतादिविषये स्वीयां योग्यतां समवर्धयन्। गङ्गास्नान-दक्षिणेश्वर-कालीघट्ट-वेलुडमठ-भिक्टोरियास्मृति-सौध-राष्ट्रियसङ्ग्रहालय-विडलातारामण्डल-विडलामन्दिर-पार्श्वनाथादीनामवगाहन- पूजन-स्तवन- श्रवण-दर्शनभोजनाद्यायोजनं सर्वेषां चेतः समतोषयत्।

जून्मासि अष्टादशेऽहनि पूर्वनिर्दिष्टे समये समाप्त्यनुष्ठानं सवैभवं समायोजितमासीत्। समाप्त्यनुष्ठाने सभापतिपदमलङ्कृतवान् तिरुपतिसंस्कृतविश्वविद्यालयस्य कुलाधिपतिचरः आचार्यः रमारञ्जन-मुखर्जीमहाभागः। प्रधानातिथिपदं समभूषयन् निम्बार्कसम्प्रदायस्य महान्तो महाराजाः परमपूजनीयाः डॉ. वृन्दावनविहारीदासकाठिया-वावास्वामिनः। रा.सं.संस्थानस्य अनौ.सं.शिक्षणस्य राष्ट्रियसंयोजकः

डॉ. रत्नमोहनझा:, दक्षिणेश्वर-रामकृष्ण- सङ्घस्य अध्यक्ष: ब्र. रीतेन्-भाईमहाराज:, मणिकुन्तला-संस्कृत-महाविद्यालयस्य अध्यक्षा ब्र. दीपादेवीमहाभागा च समुपस्थिता आसन्। स्वागतभाषणमतिथीनां परिचयप्रदानञ्चाकरोत् प्रशिक्षणवर्गसंयोजक: तन्मय-कुमार-भट्टाचार्य:। चतुर्भ्य: प्रान्तेभ्य: चत्वार: वर्गार्थिन: वर्गानुभवमवदन्। प्रशिक्षकेषु पुरीस्थसदाशिवपरिसरस्य प्रवाचक: डॉ. सुकान्तकुमारसेनापतिमहाभाग: वर्गानुभवमश्रावयत्। प्रधानातिथय: स्वीयभाषणे संस्थानस्य एवंविधान् प्रक्रमान् भृशं प्राशंसन्। डॉ. झामहोदय: संस्थानस्य विविधप्रकल्पान् वर्गेतिवृत्तञ्च सभापति: संस्थानस्य प्रतिष्ठापने निर्माणे च वङ्गदेशस्य भूमिका महत्वपूर्णा आसीदिति सविस्तरं संस्कृतवाचा अवोचत्। वर्गार्थिभि: नृत्य-गीतादीनि प्रस्तुतानि। संस्थानपक्षत:, दक्षिणेश्वर-रामकृष्ण-सङ्घपक्षत: च ब्र. दीपा-देव्या प्रशिक्षका: वस्त्र-माल्य-गन्धादिभि: सम्पूजिता:। सभान्ते धन्यवादार्पणम् अकरोत् प. वङ्ग-प्रान्तसंयोजक: अध्यापक: तन्मय-कुमार- भट्टाचार्य:। सभां समचालयत् डॉ. नारायणदाशमहोदय:। राष्ट्रगीतेन शान्तिपाठेन च सभा समाप्तिं गता। आद्यादेव्या: कृपया प्र. वर्गोऽयं सफलो जात इति सर्वेषां मनस्सु धन्यताभाव: समजयात।।



प्रशिक्षणवर्गं समुद्घाटयन् बलदेवानन्दसागर:

## शृङ्गेर्यां प्रशिक्षणवर्ग:

राष्ट्रियसंस्कृतसंस्थानस्य अनौपचारिकसंस्कृतशिक्षाया: 'शिक्षक-प्रशिक्षणवर्ग:' एक: शृङ्गेरीस्थ-राजीवगान्धीपरिसरे सम्पन्न:। एकविंशते: दिनानां प्रशिक्षणवर्गं जून् मासस्य षष्ठे दिनाङ्के (०६.०६.२००९) परिसरप्राचार्य: रामानुज-देवनाथवर्य: दीपप्रज्वालनपुरस्सरं समुदजीघटत्। कार्यक्रमे समुपस्थित: गङ्गानाथझापरिसरस्य डा. जनार्दनप्रसादपाण्डेय: संस्कृतवाङ्मयस्य गरिमाणं प्रतिपाद्य कार्यक्रम-सफलतायै मङ्गलकामनां प्रायच्छत्। विशिष्टातिथिरूपेण समागतेन आचार्यबलदेवानन्दसागरवर्येण संस्कृतभाषाया: भारतीयसंस्कृतेश्च महत्त्वम् उद्बोधितम्। परिसरस्य शिक्षाविभागाध्यक्ष: आचार्य: ए.पि. सच्चिदानन्दवर्य: शिक्षकस्य कर्तव्यविषयम् उदबोधयत्। राष्ट्रियसंस्कृतसंस्थानस्य दूरस्थशिक्षाया: अध्यापक: कू. वेङ्कटेशमूर्ति: अनौपचारिकसंस्कृतशिक्षाया: कार्यमुद्देश्यं च प्रास्तौत्। मधुकेश्वरभट्ट: स्वागतं वच:, प्रशिक्षणवर्गस्य सञ्चालकेष्वन्यतम: डा. भगवान् सामन्तरायमहाभाग: धन्यवादं च व्याहार्षीत्। अध्यापका: प्रशिक्षणार्थिनश्च कार्यक्रमे उपस्थिता आसन्। षष्ठदिनाङ्कात् २६ दिनाङ्कं यावत् प्रत्यहं प्रात: ६वादनत: आरभ्य रात्रौ १० वादनं यावत् विभिन्नप्रशिक्षणकालांशा: अभवन्। प्रशिक्षकरूपेण श्रीरामकृष्ण-पेजत्ताय:, श्रीकृष्णानन्तपद्मनाभ:, डा. पवनकुमार:, श्रीसुशान्तकुमार:, डा. भगवानसामन्तराय: डा. शान्तला, डा. बि.पी.एम्. श्रीनिवास:, डा. सि.एस्.एस्.एन्. मूर्ति:, डा. रामकृष्ण:, डा. गणेश टि.पण्डित:, डा. को गिरिधर:, डा. रामचन्द्रुलबालाजि:, श्री मधुकेश्वरभट्ट:, डा. विश्वास:, डा. चन्द्रकला आर् कोण्डि:, डा. नागरत्ना हेगडे, डा. ए.पि. सच्चिदानन्द:, डा. सोमनाथसाहु: इत्येते विभिन्नविषयेषु प्रशिक्षणार्थिन: अध्यापितवन्त:। मध्येप्रशिक्षणवर्गं होन्नावरस्थ-श्रीक्षेत्र-कर्कित: समागता: श्री ज्ञानेश्वरीपीठाधीशा: प्रशिक्षणार्थिन: परिसरसदस्यांश्च अनुगृहीतवन्त:। संस्थानमुख्यालयत: समायाता: श्रीचन्दनसिंह-कनियाल:, डा. शुक्लामुखर्जी, श्रीदीवानचन्द:, विस्तरेण ज्ञापितवान्। श्रीप्रकाशवर्य: च प्रशिक्षणवर्गं सन्दृश्य आनन्दं प्रकटितवन्त:। चतुर्विंशे दिनाङ्के (२४.०६.०९) आयाजितायां प्रशिक्षणयात्रायां प्रशिक्षणार्थिन: होरनाडु अन्नपूर्णेश्वरी-देवालयं, कळसेश्वरदेवालयं, कुद्रेमुख-राष्ट्रियोद्यानं च दृष्ट्वा समागमन्। पञ्चविंशे दिनाङ्के (२५.०६.०९) प्राचार्याणाम् आध्यक्ष्ये व्याकरणविषये मुक्तप्रश्नोत्तरम् समपद्यत।

प्रशिक्षणवर्गस्य समापनसमारोह: षड्विंशे दिनाङ्के (२६.०६.०९) अपराह्णे समभूत्। मुख्यातिथिपदं पुत्तिगेसंस्कृतमहापाठशालाया: प्राचार्य: गोपालाचार्यवर्य: व्यभूषयत्। समग्रे भारते व्यावहारिकभाषा संस्कृतभाषा यदि स्यात् समाजे विद्यमानसंघर्ष: दूरीभवेत् इत्यवादीत्। आध्यक्ष्यं परिसरप्राचार्य: रामानुजदेवनाथ: निरवक्षत्। एकविंशतौ दिनेषु प्रचलितकार्यक्रमाणां विवरणपूर्वकं स्वागतमवोचत् ए.पि. सच्चिदानन्दवर्य:। प्रशिक्षणार्थिभ्य: प्रमाणपत्रं मुख्यातिथि: प्रादात्। अन्ते डा. भगवान् सामन्तरायमहाभागस्य धन्यताविष्कृत्या ऐक्यमन्त्रेण च कार्यक्रमोऽयं समतिष्ठत।




सभां सम्बोधयन् प्राचार्य: रा.देवनाथ:। चित्रे (वामत:) ए.पी.सच्चिदानन्द:, बलदेवानन्दसागर:, जनार्दनप्रसादपाण्डेय: च दृश्यन्ते।

**यथा वृक्षस्य सम्पुष्पितस्य दूराद् गन्धो वाति,**
**एवं पुण्यस्य कर्मणो दूराद् गन्धो वाति।।**
—तैत्तिरीय आरण्यक० १०.९

## जयपुरे संस्कृतशिक्षकप्रशिक्षणवर्गः

जयपुरपरिसरे ०६-०६-२००९ दिनाङ्कतः २६-०६-२००९ दिनाङ्कं यावत् शिक्षकप्रशिक्षणवर्गः संवृत्तः। ०६.०६.०९ दिनाङ्के प्रातः एकादशवादने राज. संस्कृत-अकादम्याः अध्यक्षचरस्य प्रसिद्धकवेः राष्ट्रपति-पुरस्कारभाजः श्रीमतः हरेराम-आचार्यमहोदयस्य मुख्यातिथित्वे, परिसरप्राचार्यस्य अर्कनाथचौधरी-महोदयस्याध्यक्ष्ये प्रान्तसंयोजकस्य श्रीमतः सुदेश-कुमारशर्मणः उपस्थितौ प्रशिक्षणवर्गस्योद्घाटनसमारोहः सम्पन्नः।




वामतः- सुदेशकुमारशर्मा, पी.एन्. शास्त्री, कलानाथशास्त्री, सोमनाथमिश्रः, अर्कनाथचौधरी, वाई.एस्. रमेशश्च

प्रशिक्षणवर्गे प्रतिदिनं नवकालांशाः नियमितरूपेण अनुष्ठिताः। कालांशेषु सम्भाषणशिक्षणं, तदभ्यासः व्याकरणांशानामवबोधनम्, दीक्षापुस्तकस्थपाठानां शिक्षणम्, शिक्षणाभ्यासः, भाषाक्रीडाः, लिखितपरीक्षाश्चेत्यनेके गतिविधयः डा. वाई.एस्. रमेशमहोदयस्य संयोजकत्वे प्राचलन्।

प्रशिक्षणवर्गस्यादिमदिवसे उद्घाटनसत्रस्यानन्तरं प्रशिक्षणार्थिनां पूर्वज्ञानपरीक्षणं लिखितरूपेण विधाय तेषां ज्ञानस्तरं संवर्धयितुं अपेक्षितांशाः बोधिताः। सप्ताहानन्तरं पुनः लिखितपरीक्षां कृत्वा अपेक्षितमार्गदर्शनं विहितम्। एतस्मिन् अनौपचारिकसंस्कृतशिक्षक- प्रशिक्षणवर्गे राजस्थान-मध्यप्रदेश- जम्मू-काश्मीर-गुजरातप्रदेशेभ्यः षट्पञ्चाशत् प्रशिक्षणार्थिनः भागमगृह्णन्। परिसरस्य प्राचार्यः अर्कनाथचौधरी, राजस्थान-प्रान्तसंयोजकः डॉ. सुदेशकुमारशर्मा, साहित्यविभागस्य प्रवाचकः डॉ. रमाकान्तपाण्डेयः, डॉ. शिवचरणशर्मा (व्याख्याता, रा.व.उपा.सं.वि. किशनगढ, रेनवाल, जयपुर), डॉ. सतीशकुमारः (व्याख्याता, जम्मूपरिसरः) डॉ. कुलदीपशर्मा, (व्याख्याता, लखनऊपरिसरः) श्री जितेन्द्रथदानी (व्याख्याता, राज० कन्यामहाविद्यालयः, चितौडगढ, राज.) डॉ. पूर्णचन्द्र-उपाध्यायः, वरिष्ठव्याख्याता, (भवानीमण्डी) आचार्यः परमेश्वरनारायणशास्त्री (म.प्र. प्रान्तसंयोजकः) डॉ. वाई. एस. रमेशः इत्यादयः विद्वांसः प्रशिक्षणार्थिनः अध्यापयन्।




उद्घाटनसत्रस्य एकं दृश्यम्

प्रशिक्षणोत्तरपरीक्षणं २६-६-०९तमे दिनाङ्के आयोजनीया इति मनसि निधाय कार्यक्रमस्योपान्तिमदिवसे २५.०६.०९ दिनाङ्के वर्गस्य सम्पूर्तिसमारोहः समायोज्यत। समारोहस्य मुख्यातिथिः राजस्थानस्य वरिष्ठः प्रशासनाधिकारी श्रीमान् सोमनाथमिश्रः, सारस्वतातिथिः प्रसिद्धः राष्ट्रपतिपुरस्कारभाक् श्रीमान् देवर्षिकलानाथशास्त्री, अध्यक्षश्च परिसरप्राचार्यः इत्येवं चत्वारो विद्वांसः समारोहस्य शोभां समवर्धयन्। सर्वैश्च तैः प्रशिक्षणार्थिनामनुभवकथनं श्रुत्वा- 'भाषणेनैव भाषाया भाषात्वसिद्धिः इति, व्यवहारे नूतनव्यावहारिकशब्दानामन्वेषणे तत्पराः भवन्त्विति, सततं पूर्वाभ्यासेन सामाजिकान् संस्कृतं प्रति आक्रष्टुं यतन्तु' इति च प्रशिक्षणार्थिनः सम्प्रेरिताः।

त्रिभिः सामूहिकगीतैः दशानां प्रशिक्षणार्थिनाम् अनुभवकथनेन, प्रमाणपत्रवितरणेन, प्रान्तसंयोजकस्य सुदेशकुमारशर्मणो धन्यवादज्ञापनेन, राष्ट्रगीतेन च समारोहः सुसम्पन्नः।

## हरिद्वारे समारब्धः शिक्षकप्रशिक्षणवर्गः

**संस्कृतं राष्ट्रियैकतायाः पाठं शिक्षयति** – डा. सुधा पाण्डेया

देहली-हरियाणा-उत्तराखण्ड-पञ्जाब-हिमाचलप्रदेश-राज्यानां प्रशिक्षणार्थिनां प्रशिक्षणाय हरिद्वारे उत्तराञ्चल-संस्कृत-अकादम्यां २६-६-०९ दिनाङ्कतः २१ दिनानां शिक्षकप्रशिक्षणवर्गः आयोज्यमानोऽसित। उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः डा. सुधारानी पाण्डेया, रा.सं. संस्थानस्य लखनऊ-परिसरस्य डा. लक्ष्मीनिवासपाण्डेयः, उत्तराञ्चल-संस्कृत-अकादम्याः कोषाध्यक्षः भूपेन्द्रप्रसादकाण्डपालः, अनौ. सं.शिक्षणस्य उत्तराञ्चलप्रान्तसंयोजकः डा. बुद्धदेवशर्मा च दीपप्रज्वालनपुरस्सरं वर्गस्यास्य शुभारभं कृतवन्तः।

कार्यक्रमस्य मुख्यातिथिः डा. सुधारानी पाण्डेया प्रशिक्षार्थिनः सम्बोधयन्ती उक्तवती यत् संस्कृतं राष्ट्रिय-एकतायाः पाठं शिक्षयति। वस्तुतः संस्कृते सा काचिद् विशिष्टा शक्तिः वर्तते या अन्यासु कासुचिदपि भाषासु न दृश्यते। अस्मिन् विखण्डिते युगे विश्वबन्धुत्वस्य एकसूत्रे योजनस्य कार्यं केवलं संस्कृतमेव कर्तुं शक्नोति। वर्तमानसमये संस्कृतस्य स्थितिः अत्यन्तं दयनीया वर्तते। एतस्य मुख्यकारणं संस्कृतज्ञानां कर्तव्यविमुखता अस्ति। वैज्ञानिकाः वदन्ति संस्कृतं सङ्गणकस्य कृते सर्वोत्तमं माध्यमम् अस्ति इति, एतादृश्यां स्थितौ सत्याम् संस्कृतभाषा संस्कृतज्ञैः नैव



उद्घाटनावसरे बुद्धदेवशर्मा, भूपेन्द्रप्रसादकाण्डपालः, लक्ष्मीनिवासपाण्डेयः, सुधारानीपाण्डेया च

उपेक्षणीया। यदि संस्कृतशिक्षकाः एव संस्कृतमाध्यमेन अध्यापनं व्यवहारं च न करिष्यन्ति तर्हि तेषां छात्राः कथं संस्कृतेन सम्भाषणं करिष्यन्ति। डॉ. पाण्डेया उक्तवती यत् संस्कृतं संस्कृत- माध्यमेन पाठयितुं राष्ट्रियसंस्कृतसंस्थानस्य इयम् अभिनवयोजना अत्यन्तं प्रशंसनीया वर्तते इति।

वर्गसंयोजकः डॉ. बुद्धदेवशर्मा प्रास्ताविके भाषणे उक्तवान् यत् वर्गे उत्तरप्रदेश–उत्तराखण्ड–दिल्ली–हरियाणा– पञ्जाब–हिमाचलप्रदेशप्रभृतिभ्यः राज्येभ्यः आगतान् प्रशिक्षार्थिनः स्वागतीकृत्य आयोज्यमानावासीयवर्गस्य आवश्यकतां स्वरूपं वैशिष्ट्यं च विवृतवान्। संस्कृतस्य स्थितिं वर्णयता तेन प्रोक्तं यत् अन्याः भाषाः तत्तद्भाषामाध्यमेन पाठ्यन्ते। किन्तु केवलं संस्कृतमेव एका भाषा अस्ति या अन्यभाषामाध्यमेन पाठ्यते। एतदेव संस्कृतविकासे अवरोधस्य मुख्यं कारणमस्ति इति। राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्य प्राध्यापकः डॉ. लक्ष्मीनिवासपाण्डेयः उक्तवान् यत् 'संस्कृतस्य संस्कृतेश्च संरक्षणार्थं कानिचन महत्तराणि कार्याणि करणीयानि भविष्यन्ति। समाजस्य उन्नतिः केवलं विज्ञानेन एव सम्भवितुं न अर्हति। एतदर्थं अध्यात्मस्य, नैतिकतायाः ज्ञानस्य च महती आवश्यकता वर्तते; तदर्थम् अपेक्षिताः अंशाः संस्कृते सन्ति। विश्वपटले भारतस्य भव्यरूपं ज्ञानपुञ्जरूपिणः संस्कृतस्य माध्यमेन साधयितुं शक्नुमः' इति।

कार्यक्रमस्य अध्यक्षः गुरुकुलकाङ्गडीविश्वविद्यालयस्य प्राच्यविद्यासङ्कायस्य अध्यक्षः डॉ. मनुदेवः विभिन्नप्रदेशेभ्यः समागतान् प्रशिक्षार्थिनः सम्बोधयन् उक्तवान् यत् संसारे यत् किमपि विद्यते तत् सर्वमपि संस्कृते विद्यते। आवश्यकता आविष्कारस्य जननी अस्ति। संस्कृतस्य पुनरपि जनभाषाकरणस्य आवश्यकता वर्तते। एतादृशमेव एकम् आविष्कारं राष्ट्रियसंस्कृतसंस्थानम् अनौपचारिकसंस्कृतशिक्षकप्रशिक्षणवर्गरूपेण अकरोत्, यस्य माध्यमेन संस्कृतशिक्षकाः न केवलं संस्कृतभाषया पठनपाठनं कुर्वन्ति अपितु तेषां व्यावहारिकी भाषा अपि संस्कृतमेव अस्ति।

अस्मात् पूर्वं प्रशिक्षणवर्गस्य उद्घाटनावसरे आरम्भे शिवकुमारमिश्रः आशीषकुमारः च वैदिकं मङ्गलाचरणम् अकुरुताम्, सरस्वतीवन्दनां वेदप्रकाशपाठकः अकरोत्। स्वागतगीतं च नीरजलता वन्दना सिंहः च गीतवत्यौ। मञ्चसञ्चालनं डॉ. राघवकुमारझाः अकरोत्। अतिथीनां धन्यवादज्ञापनं रोशनलालः कृतवान्। अस्मिन् अवसरे डॉ. ईश्वरभारद्वाजः, हरीशगुरुरानी, पी.एस. सैनी, प्रकाशजोशी, हर्षखत्री, सुधीरपालीवालः इत्यादयः उपस्थिताः आसन्। प्रशिक्षणवर्गे डॉ. लक्ष्मीनिवासपाण्डेयः, डा. आनन्दश्रीवास्तवः, डा. राघवझाः, डा. बृहस्पतिमिश्रः, श्रीकिशोरीलालः, डॉ. रत्नमोहनझाः अन्ये च प्रशिक्षकरूपेण उपस्थिता भवन्ति। वर्गोऽयं १६.७.०९तमे दिनाङ्के सम्पन्नताम् एष्यति।

## जम्मूपरिसरे सम्पन्ना विशिष्टव्याख्यानमाला

अप्रैलमासस्य अष्टम–नवम–दिनाङ्कयोः विशिष्टव्याख्यानमाला आयोजिता आसीत्। तत्र प्रथमदिने जम्मू–विश्वविद्यालयस्य भूतपूर्वः संस्कृतविभागाध्यक्षः आचार्यः रामप्रतापवेदालङ्कारः चमत्कारसम्प्रदायम् अधिकृत्य, आचार्यः प्रियतमचन्द्रशास्त्री शिवस्वामिनः चित्रकाव्यमधिकृत्य च स्वीयं व्याख्यानं प्रस्तुतवन्तौ। व्याख्यानमालायाः द्वितीये अहनि कुरुक्षेत्रविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यः सुरेन्द्रमोहनमिश्रः शाक्तदर्शनविषये उपन्यस्तवान्। सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरेण आचार्येण अभिराजराजेन्द्रमिश्रवर्येण शैवप्रत्यभिज्ञादर्शनम्, रामकथायाः विश्वव्यापकता चेति विषययोः विशिष्टं भाषणमकारि। परिसरप्राचार्यस्य विश्वमूर्तिशास्त्रिणः अध्यक्षतायां सम्पन्ने अस्मिन् कार्यक्रमे संस्थानस्य रणवीरपरिसरस्य, जम्मूविश्वविद्यालयस्य च अध्यापकगणः, जम्मूप्रान्तस्य विद्यालयमहाविद्यालयानां संस्कृतशिक्षकाः छात्राश्च उपस्थिता आसन्।

- **वेदाध्ययनशिबिरम्**

जिज्ञासूनां छात्राणां प्रार्थनानुसारं पूर्ववर्षेषु इव एतस्मिन् ग्रीष्मावकाशे निःशुल्कं वेदाध्ययनशिबिरमेकं परिसरे आयोजितम्। परिसरप्राचार्यः विश्वमूर्तिशास्त्रिवर्यः १९–५–०९ तः जूनमासं यावत् वटून् अध्यापितवान्।

- **सङ्गणकप्रशिक्षणम्**

सङ्गणकशिक्षां प्राप्तुम् इच्छद्भ्यः परिसरसदस्येभ्यः ग्रीष्मविरामे सङ्गणककक्ष्या परिसरे कल्पिता आसीत्।




विशिष्टव्याख्यानमालायाः उद्घाटनावसरे सरस्वत्याः चित्रे माल्यार्पणं कुर्वन्तः अभिराजराजेन्द्रमिश्रः, सुरेन्द्रमोहनमिश्रः, प्राचार्यः विश्वमूर्तिशास्त्री, परिसरसदस्याश्च।

## आदर्शशोधसंस्थाने राष्ट्रियसङ्गोष्ठी

राष्ट्रियसंस्कृतसंस्थानेन आदर्शशोधसंस्थानत्वेन मानितायां हैदराबादस्थायां संस्कृतपरिषदि क्षेमेन्द्रस्य संस्कृतसाहित्यसेवा इति विषयमधिकृत्य एप्रिल्मासस्य अष्टम-नवमदिनाङ्कयोः राष्ट्रियसङ्गोष्ठी समायोजिता। संस्थानकुलपतिः आचार्यराधावल्लभत्रिपाठिमहोदयः विशिष्टातिथिरूपेण समुपस्थाय विशिष्टं भाषणमकरोत्। कार्यक्रमे महामहोपाध्यायः पुल्लेल-श्रीरामचन्द्रुडुमहोदयः, तिरुपतिस्थ-श्रीवेङ्कटेश्वरवेदविश्वविद्यालयस्य कुलपतिः आचार्यः सन्निधानं-सुदर्शनशर्मा, उस्मानिया वि.वि.कुलपतिः आचार्यः तिरुपतिरावः, तदितरे देशस्य विभिन्नभागेभ्यः समागताः विद्वत्तल्लजाः च क्षेमेन्द्रस्य संस्कृतसाहित्यसेवामधिकृत्य परिचर्चामकुर्वन्। संस्कृतपरिषदः निदेशकः डा. श्रीनिवासवरखेडिः अतिथीन् सर्वान् स्वागतीकृत्य परिषदः नैकान् क्रियाकलापान् न्यवेदयत्। सन्दर्भेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन मुद्रिताः क्षेमेन्द्रलघुकाव्यसङ्ग्रहः, संस्कृतसङ्गणककोशः, सूक्तिमाला, गणकपाणिनीयम्, प्रवासी, शक्तिवादः, Sanskrit works rendered into Urdu चेति सप्तग्रन्थाः प्रकाशिताः आसन्। डा. श्रीनिवासशर्मा कार्यक्रमनिर्वहणमकरोत्।




ग्रन्थलोकार्पणं कुर्वन्तः विद्वांसः
वामतः श्रीनिवासवरखेडिः, सुदर्शनशर्मा, तिरुपतिरावः, राधावल्लभत्रिपाठी, पुल्लेलरामचन्द्रुडुः च

## संस्थानविदुषां क्रियाकलापाः

आचार्यः आजादमिश्रः (भोपालपरिसरः) उज्जयिनीस्थया कालिदास-अकादम्या १९-५-०९ दिनाङ्के नरसिंहपुरजनपदे मोहदनामके संस्कृतग्रामे "संस्कृतसाधनायाः विविधाः आयामाः" इति विषयमधिकृत्य समायोजिते कार्यक्रमे समासविषयमधिकृत्य विशिष्टं व्याख्यानम् अकरोत्।

महर्षिपतञ्जलि-संस्कृतसंस्थानद्वारा १-६-०९ तः ५-६-०९ पर्यन्तं समायोजिते अखिलभारतीय-विद्वत्सम्मेलने आचार्यः आजादमिश्रः, डा. ब्रजभूषण ओझा (भोपालपरिसरः) च विशिष्टं व्याख्यानं कृतवन्तौ।

२५-६-०९ तः २७-६-०९ पर्यन्तं महर्षि-पाणिनि-संस्कृत-विश्वविद्यालयेन उज्जयिन्याम् आयोजिते अखिलभारतीय-संस्कृतसम्मेलने 'भाषाव्याकरणयोः पौर्वापर्यम्' इति विषयमधिकृत्य शोधलेखं प्रास्तौत्।

## भविष्यति विश्वसंस्कृतसम्मेलनम्

ऐषमः सितम्बर-मासस्य प्रथमदिनाङ्कात् पञ्चमदिनाङ्कं यावत् जापानदेशे क्योटोनगरे चतुर्दशं विश्वसंस्कृतसम्मेलनं भविता। अन्ताराष्ट्रिय-संस्कृतविद्या समवायेन आयोजिष्यमाणे एतस्मिन् सम्मेलने आहूताः केचन भारतीयविद्वांसः अपि भागं गृह्णीयुः। सम्मेलनाङ्गतया आयोज्यमाना पण्डितपरिषत्, कविसम्मेलनं च राष्ट्रियसंस्कृतसंस्थानेन प्रायोजितं भवति।

## अचिरात् प्रकाशपथमवतरन्ति



- धर्मसूरिविरचितः नरकासुरविजयव्यायोगः
  सं.-शर्मिला बागची
- न्यायकुसुमाञ्जलिः
  - सं. आचार्यः वाचस्पतिद्विवेदी
- नवशृङ्खलायां संस्कृतविमर्शस्य द्वितीयः अङ्कः।
- भर्तृहरिनीतिशतकम् आधारीकृत्य रचिता स्वाध्यायसामग्र्याः पूर्वार्धम् - डा. उपेन्द्रराव:
- Modern Sanskrit Writings in Karnataka
  - ले.-डा.एस्. रङ्गनाथः।

## भविष्यति दीक्षान्तसमारोहः

राष्ट्रियसंस्कृतसंस्थानस्य तृतीयः दीक्षान्तसमारोहः ऐषमः सितम्बरमासस्य १२ दिनाङ्के पूर्वाह्णे नवदेहलीस्थ-सिरीफोर्टप्रेक्षागृहे भविता। २००७-२००८, २००८-२००९ तम-शैक्षिकसत्रयोः शास्त्री, आचार्यः, शिक्षाशास्त्री, शिक्षाचार्यः इत्येतासु कक्ष्यासु उत्तीर्णाः विद्यावारिधिं च उत्तीर्णाः छात्राः एतस्मिन् समारोहे भागं ग्रहीतुमर्हन्ति। कार्यक्रमे साक्षात्-उपस्थातुकामाः एते छात्राः अधोनिर्दिष्टरीत्या तत्तत्स्थानेषु सम्पर्कं कुर्युः-

**संस्थानपरिसरेषु** (यत्र अधीवन्तः) – २०-८-२००९ पर्यन्तम् (कार्यदिवसेषु)

**संस्थानमुख्यालये परीक्षाविभागे** – २१-८-२००९ तः २५-८-२००९ पर्यन्तम्

अपि च एतद्विषये विवरणं द्रष्टुमर्हन्ति - २५-७-०९ दिनाङ्कस्य Employment News / रोजगारसमाचारपत्रिकायाम्-संस्थानस्य-विश्वव्यापिजालपुटे (www.sanskrit.nic.in) वा।

न स्तुयादात्मनाऽऽत्मानं न परं परिवादयेत्।
न सतोऽन्यगुणान् हिंस्यान्नासतः स्वस्य वर्णयेत्।।
–यशस्तिलकचम्पू, ८.३५०

## विविधाः प्रवेशपरीक्षाः समभवन्

### पू.शि.शा.प (PSST)

२००८-२००९ शैक्षिकसत्रे शिक्षाशास्त्रिकक्ष्यां प्रविविक्षूणां चयनाय १६-५-०९ दिनाङ्के देशे विभिन्नकेन्द्रेषु सञ्चालितायां पूर्वशिक्षाशास्त्रिपरीक्षायां (PSST) **५७६८ अभ्यर्थिनः** भागमगृह्णन्। तेषु १२२८ जनाः उत्तीर्णाः घोषिताः। तेष्वपि उत्तीर्णेषु वरीयांसः (नियमानुसारं) **८०० अभ्यर्थिनः** संस्थानपरिसरेषु शिक्षाशास्त्रिकक्षायायां प्रवेशं प्राप्स्यन्ति। इतरप्रवेशपरीक्षाद्वयविवरणम् इहावलोक्यताम्–

| परीक्षा | दिनाङ्कः | प्रविष्टाः | उत्तीर्णाः |
|---|---|---|---|
| **पूर्व-शिक्षाचार्यपरीक्षा (P.S.A.T.)** | २०-६-०९ | २३९ | ५३ |
| **पूर्वशोधपरीक्षा (P.R.T.)** | २०-६-०९ | ६२३ | (अगस्तमासस्य प्रथम-सप्ताहे परिणामघोषणा) |

## अस्थायिपदानि विज्ञापितानि

रा.सं.संस्थानस्य विविधकार्यक्रमान् साधयितुं विकासाधिकारि-वरिष्ठानुसन्धातृ-कनिष्ठानुसन्धातृ-परियोजनाकार्यकर्त्रादि-पदनिमित्तं (निर्धारितवेतनमानमनुसृत्य) आवेदनपत्राणि स्वीक्रियन्ते इति उद्घोषणा कृता। एतद्विषयकं विवरणसहितं विज्ञापनं रा.सं.संस्थानस्य विश्वव्यापिजालपुटे (www.sanskrit.nic.in) द्रष्टुमर्हन्ति।

## वार्षिकपरीक्षापरिणामः घोषितः

राष्ट्रियसंस्कृतसंस्थानेन २००८-०९ शैक्षिकवर्षे आयोजितवार्षिकपरीक्षासु उत्तीर्णानां संख्याविवरणम् इत्थमस्ति–

| कक्ष्या | परीक्षां लिखितवतां संख्या | उत्तीर्णानां संख्या |
|---|---|---|
| प्रथमा-III | २७० | २१७ |
| पूर्वमध्यमा-II | ९६१ | ८१० |
| प्राक्शास्त्री-II | ११७० | १०५५ |
| उत्तरमध्यमा-II | ६८५ | ६३३ |
| शास्त्री-I | १६५६ | १५२४ |
| शास्त्री-II | १४५४ | १४१८ |
| शास्त्री-III | १०४५ | ८८० |
| आचार्यः-I | १२६१ | ११२३ |
| आचार्यः-I | ९३२ | ८३२ |
| शिक्षाशास्त्री | ७४५ | ७४० |
| शिक्षाचार्यः | २४ | २४ |
| **योगः** | **१०२०३** | **९२५६** |

### संस्थानेन विश्वव्यापिजालपुटे अचिरात् निवेशयिष्यन्ते

- साहित्यदर्पणः
- रसगङ्गाधरः
- अभिज्ञानशाकुन्तलम्

**यः समुत्पतितं क्रोधं क्षमयैव निरस्यति।**
**यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते॥**
–वा.रा., ५.५५.६

❖ ❖ ❖

**कुपितोऽपि गुणायैव गुणवान् भवित ध्रुवम्।**
**स्वभावमधुरं क्षीरं मथितं तु रसोत्तरम्॥**
–नराभरणम्, ३०

❖ ❖ ❖

**अहो! सा तादृशी गुणानां प्रकृतिर्या**
**विपक्षहस्तपतिताऽपि सुखयति।**
–अनर्घराघवम्, ४.१०-११

## छात्रवृत्तिसमाचारः

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षमिव गतशैक्षिकवर्षे (२००८-०९) अपि संस्कृताध्ययनरतानां प्रोत्साहनाय छात्रवृत्तिः घोषिता आसीत्। मानदण्डविशेषमनुसृत्य आवेदकैः छात्रैः पूर्ववर्षे प्राप्ताङ्कानामाधारेण तेभ्यः चितेभ्यः छात्रवृत्तिः दीयते। गतशैक्षिकवर्षे आहत्य ३३१५२ छात्राः अखिलभारतस्तरे छात्रवृत्त्यर्थम् अर्हाः घोषिताः। **छात्रवृत्तिरूपेण एतेभ्यः दीयमानराशियोगः भवति - रु. १०,४६,६४,५००.** प्रकृतशैक्षिकवर्षे (२००९-१०) छात्रवृत्तिनिमित्तम् आवेदनपत्र-स्वीकरणविषये विज्ञापनमेकं प्रसिद्धपत्रिकासु/ संस्थानस्य विश्वव्यापि-जालपुटे (www.sanskrit.nic.in) सितम्बरमासे प्राकट्यमेष्यति।

## अचिरात् लोकायार्पिताः भविष्यन्ति सान्द्रमुद्रिकाः/DVD

- संक्षेपरामायणम्
- वैदिक विज्ञान
- Vedic Mathamatics
- कविभास्करी
- प्रमाणवार्तिकम्
- शब्दकल्पद्रुमः




**चलच्चित्रात्मकपुस्तकम् (Animated book)**

- कथादशकम्

## संस्कृत शिविर शुरू

बूंदी। राष्ट्रीय संस्कृत संस्थान नई दिल्ली की ओर से संचालित अनौपचारिक शिक्षण केन्द्र के द्वितीय चक्र का संस्कृत शिविर शुभारंभ शनिवार को दत्तात्रेय शिक्षण संस्था में हुआ। मुख्य अ... विद्या भारती के उत्तर क्षेत्र योग... योगाचार्य थे। विशिष्ट... जिला महामंत्री...

उधमपुर 6

# संस्कृत से होती है संस्कार और सद्विचार की प्राप्ति

## अनौपचारिक शिक्षण केंद्र का उद्घाटन

● अमर उजाला ब्यूरो

**उधमपुर।** राजकीय उच्चतर माध्यमिक कन्या विद्यालय उधमपुर में अनौपचारिक संस्कृत शिक्षण केंद्र प्रथम दीक्षा का उद्घाटन शनिवार को किया गया।

यहां मुख्य अतिथि के रूप में राष्ट्रीय संस्कृत संस्थान मानित विश्वविद्यालय कोट भलवाल जम्मू के प्राचार्य प्रो. विश्वमूर्ति शास्त्री मौजूद रहे। संस्कृत शिक्षण केंद्र के उद्घाटन समारोह पर प्रो. विश्वमूर्ति शास्त्री ने त्रैमासिक संस्कृत शिक्षण केंद्र में सम्मिलित हो रही छात्राओं को संबोधित करते हुए कहा कि समाज में संस्कृत ज्ञान से ही नैतिक मूल्यों का ह्रास होने से बचाया जाना संभव है। छोटी ... में नैतिक शिक्षण जरूरी है, लेकिन ... टूटने व ...

की प्राप्ति होगी, वहीं हमें उच्च ज्ञान के साथ साथ ऊंचे दर्जे का सभ्य नागरिक बनने में मदद मिलेगी। विद्या की देवी सरस्वती के श्वेत वस्त्र, हंस, वीणा आदि को परिभाषि... करते हुए उनका कहना था कि श्वेत रं... सतो गुण का प्रतीक है, जबकि अन्य रं... में तमो गुण व रजो गुण समाहित ... सात्विकता से विद्या हासिल करना चा...

**आह्वान**

**समाज को टूटने और बिखरने से बचाने के लिए आगे आएं**

ध्यानपूर्वक मनोयोग ... विद्या ग्रहण ... कल्याणकारी है ... समाज में हर स्थ... आदर व सम्मान ... होता है। संस्कृत ... सभी ज्ञान को ... कर सकते हैं। इस मौके पर भा... शास्त्री ने भी विचार प्रक... संस्कृत व इसमें अपार ज्ञान ... प्रकाश डाला। इस मौके पर ... हायर सेकेंडरी स्कूल की प्रिंसि... धर मौजूद रहीं। वाचस्पति ... किया। मौके पर ...



# संस्कृत से विद्यार्थियों का सर्वांगीण विकास संभव

- अनौपचारिक संस्कृत शिक्षण केंद्र का उद्घाटन किया
- संस्कृत में रुचि लेकर जीवन को सही दिशा दे सकते हैं युवा

**ऊधमपुर, जागरण संवाद केंद्र :** लड़कियों के हायर सेकेंडरी स्कूल में शनिवार को मानव संसाधन विकास मंत्रालय द्वारा संचालित तीन माह तक चलने वाले अनौपचारिक संस्कृत शिक्षण केंद्र का विधिवत उद्घाटन हुआ। कार्यक्रम में छात्राओं को जानकारी दी गई कि किस तरह देश संस्कृति व विद्यार्थी के भविष्य को संभालने के लिए संस्कृत भाषा इस्तेमाल किया जा सकता है।

इस मौके पर राष्ट्रीय संस्कृत संस्थान मानित विश्वविद्यालय कोट भलवाल जम्मू के प्रो. डा. विश्वमूर्ति शास्त्री मुख्य मेहमान थे। कार्यक्रम की शुरुआत मुख्यअतिथि ने मां सरस्वती की मूर्ति के आगे दीप प्रज्ज्वलित कर की। उसके बाद उन्होंने छात्राओं को बताया कि वर्तमान में देश के विद्यार्थी अज्ञानता के अंधेरे में जाकर अपना जीवन नष्ट कर रहे है, लेकिन अगर वह चाहे तो संस्कृत भाषा में रुचि लेकर और श्लोकों का अध्ययन करके अपने जीवन को ...

संचालन कर रहे अध्यापक वाचसपति ने बताया कि संस्कृत भाषा का यह प्रशिक्षण शिविर तीन माह तक इसी स्कूल में चलेगा। इसमें स्कूल की 35 से भी ज्यादा छात्राएं हिस्सा ले रही हैं। उन्होंने बताया कि इस शिविर के आयोजन करने का उद्देश्य यही है कि विद्यार्थियों का जीवन सही दिशा की ओर रहे और वह देश की संस्कृति और सभ्यता के साथ जुड़े रहे। उन्होंने बताया कि आठ साल से भी ज्यादा समय से सरकार की तरफ इन शिविरों का आयोजन देश के विभिन्न हिस्सों में किया जा रहा है। सरकारी महिला कालेज ...

## संस्कृत शिक्षण केन्द्र का समारोहपूर्वक उद्घाटन

**फैजाबाद।** संस्कृत संस्थानम् के अनौपचारिक संस्कृत शिक्षण केन्द्र का समारोह पूर्वक उद्घाटन सर्वोदय इण्टर कालेज रामगंज में किया गया। विद्यालय के प्रबन्धक डा. अरिसूदन पाण्डेय ने मां सरस्वती के चित्र के सामने दीप जलाकर उद्घाटन किया। उन्होंने कहा कि भारतीय सभ्यता में गरिमामय इतिहास की वाहक संस्कृत भाषा को पुनः जन-जन की भाषा बनाना होगा। संस्कृत भाषा ने वह सुदृढ़ आधार स्तंम्भ प्रदान किया है जिस पर हमारे देश की आदर्श पूर्ण सभ्यता और संस्कृति टिकी है। समारोह की अध्यक्षता प्रधानाचार्य मुहम्मद अहमद अंसारी ने की। उन्होंने कहाकि संस्कृत के द्वारा ही संस्कृति की धारा इस देश में प्रवाहमान है उसी से धर्मनिरपेक्षता कायम है। इस अवसर पर जगकिशोर लाल श्रीवास्तव ने भी विचार व्यक्त किया। संचालन शशि शेखर ने किया।

# संस्कृत से ही विश्वकल्याण हो सकता है:रामदत्त योगाचार्य

बून्दी 21 दिसम्बर। राष्ट्रीय संस्कृत संस्थान (मानित विश्वविद्यालय) नई दिल्ली द्वारा संचालित अनौपचारिक शिक्षण केन्द्र के द्वितीय चक्र का शुभारम्भ शनिवार को दत्तात्रेय शिक्षण संस्थान (सैकण्डरी) देवपुरा बून्दी में हुआ। इस कार्यकम के मुख्यातिथी विद्या भारती के उत्तर क्षैत्र योगप्रमुख रामदत्त योगाचार्य पठानकोट (पंजाब) थे। विशिष्टातिथी आर्य समाज के जिला महामंत्री अनुराग शर्मा व अध्यक्ष संस्कृत भारती के जिला संयोजक अभयदेव थे। कार्यकम का शुभारम्भ दीप प्रज्वलन से किया गया व ओम प्रकाश ने सरस्वती वन्दना की। संस्कृत गीत रचयेम संस्कृत भवनम् सेकुछ समय के लिए सम्पूर्ण वातावरण संगीतमय हो गया। मुख्यातिथी रामदत्त योगाचार्य ने अपने उद्‌बोधन मे कहा कि संस्कृत में ही योग है और योग से ही विश्व का कल्याण इसलिए संस्कृत से ही विश्वकल्याण हो सकता है। हमारे देश की अखण्डता के लिए संस्कृत की अपयोगिता एवं आवश्यकता स्वतः ही परिलक्षित होती है। उन्होने बताया कि आधुनिक वैज्ञानिक यदि नई खोज करता है तो उसे संस्कृत साहित्य में गोता लगाना ही पडेगा। तैत्तिरीयोपनिषद का उदाहरण देते हुए उन्होने बताया कि मनीषियों ने विद्युत तरंगों का वर्णन उपनिषदों में किया है और वही तरंगे आज हम मोबाईल में देखते है। योग का उल्लेख करते हुए अथ योगानुशासन तथा योगश्चितवृतिनिरोधः की व्याख्या उन्होने अनेक उदाहरण देते हुए की। विशिष्टातिथि शर्मा ने कहा कि संस्कृत के विद्वानों की विद्वता के कारण ही बून्दी को छोटी काशी कहा जाता है। संस्कृत भारती के जिला संयोजक शर्मा ने सभी को आशिर्वचन कहा। केन्द्र में दो दीक्षा कार्यक्रम (त्रेमासिक) चलेगे जिनमें द्वितीयादीक्षा की कक्षाये स्थानीय विद्यालय दत्तात्रेय में 3 बजे से 4.30 बजे तक व प्रथमादीक्षा की कक्षायें 5 से 6 बजे तक लगाई जायेगी। इन दीक्षा कार्यक्रमों में कोई भी स्त्री-पुरुष 30 रूपयें पंजीयन शुल्क जमा करवाकर निःशुल्क संस्कृत सम्भाषण एवं संस्कृत व्याकरण का अध्ययन कर सकते है।

## संस्कृताध्ययनासक्तिः नैव क्षीणा

गतशैक्षिकवर्षे २९७१९ जनाः संस्कृतस्य प्राथमिकं ज्ञानं प्राप्तवन्तः। राष्ट्रियसंस्कृतसंस्थानेन समग्रे देशे २००८ जुलैतः २००९ एप्रिल् पर्यन्तं विभिन्नस्थानेषु अनौपचारिकसंस्कृतशिक्षणकेन्द्रेषु) आहत्य २९७१९ जनाः (सामाजिकाः) भागग्रहणं कृतवन्तः। जुलै-०८ तः अप्रैल ०९ पर्यन्तं त्रैमासिकचक्रद्वये अनौपचारिक-संस्कृतशिक्षणे भागं गृहीतवतां सङ्ख्या (राज्यशः)–

| राज्यम् | प्रथमचक्रम् | | | द्वितीयचक्रम् | | |
|---|---|---|---|---|---|---|
| | प्र.दीक्षा | द्वि.दीक्षा | योगः | प्र.दीक्षा | द्वि.दीक्षा | योगः |
| आन्ध्रप्रदेशः | १२५ | – | १२५ | २६८ | १६ | २८४ |
| बिहारम् | १५१ | ६० | २११ | १४० | १०३ | २४३ |
| देहली | २१२ | – | २१२ | ४६ | ५० | ९६ |
| गुजरात् | २११ | ५५ | २६६ | २४१ | ६१ | ३०२ |
| हरियाणा | ५५० | ६१ | ६११ | १६० | २३८ | ३९८ |
| हि.प्रदेशः | ३०१ | ६४ | ३६५ | २६ | ६९ | ९५ |
| जम्मू-काश्मीरम् | ३७७ | – | ३७७ | ३० | २५ | ५५ |
| कर्णाटकम् | ९६१ | ३० | ९९१ | ३८९ | ३१० | ६९९ |
| केरलम् | ६९ | ० | ६९ | – | ४७ | ४७ |
| महाराष्ट्रम् | – | – | – | – | २० | २० |
| म.प्र. छत्तीसगढ़ | १४०३ | ४७९ | १८८२ | ४७९ | ११२५ | १६०४ |
| पूर्वोत्तरराज्यानि | २५०७ | १०५८ | ३५६५ | ७८४ | २१६३ | २९४७ |
| उत्कलम् | १७१३ | ३१३ | २०२६ | १८१ | १६०८ | १७८९ |
| पञ्जाबः | ६० | ३१ | ९१ | – | ९३ | ९३ |
| राजस्थानम् | ९१२ | ३१ | ९४३ | ३५० | ३३३ | ६८३ |
| उत्तराखण्डः | – | – | – | ५१९ | ६२ | ५८१ |
| उत्तरप्रदेशः | २३७३ | १५३६ | ३९०९ | ११४७ | १५२४ | २६७१ |
| प.वङ्गः | ७८९ | ० | ७८९ | २०० | ४८० | ६८० |
| योगः | | | **१६४३२** | | | **१३२८७** |

**चक्रद्वये दीक्षाद्वये गृहीतभागानाम् आहत्य सङ्ख्या – २९७१९**

## परीक्षाविभागसम्बद्धा समयसारिणी

- **०९-१० वर्षस्य वार्षिकपरीक्षार्थम्**
  **आवेदयितुं कालावधिः** – १५-९-०९ तः ३०-१०-०९
  ५० रूप्यकाणां विलम्बशुल्केन सह- ०३-११-०९ तः १६-११-०९
  १०० रूप्यकाणां विलम्बशुल्केन सह-१७-११-०९ तः ३०-११-०९
- **वार्षिकी आन्तरिकी परीक्षा**
  (पूर्वमध्यमा I – प्रा.शा./उ.म. I) – ०१-४-१० तः १०-४-१०
- **वार्षिकपरीक्षा** – १२-४-१० तः २९-४-१०
  (प्र-III, पू.म.-II, प्रा.शा./उ.म. II, शास्त्री, आचार्यः, शिक्षाशास्त्री, शिक्षाचार्यः इत्येतासां कक्षाणां कृते)
- **पू.शि.शा.प. (PSST)-२०१०-विषयकं विज्ञापनम्**
  (प्रसिद्धपत्रिकासु/संस्थानस्य वि.व्या.जालपुटे (www.sanskrit.nic.in) — २०१० जनवरीमासे
- **पू.शि.शा.प. २०१० परीक्षा** – १५-५-१०
- **पू.शिक्षाचार्यपरीक्षा (PSAT) विषयकं विज्ञापनम्**
  पत्रिकासु/जालपुटे (www.sanskrit.nic.in) – २०१० मार्चमासे
- **पूर्वशिक्षाचार्यपरीक्षा** (PSAT) – १२-६-१०

## राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालयसम्बद्धानां विशिष्टकार्यक्रमाणां सम्भावितं तिथिपत्रकम्। सत्रम् २००९-१०

| | |
|---|---|
| १ तः १५.६.०९ | नवीनपाठ्यक्रमाणां प्रकाशनम् |
| १५ तः ३०.६.०९ | परिसरेषु नूतनशैक्षिकसत्राय छात्राणां प्रवेशप्रक्रिया |
| १.७.०९ | शैक्षिक-सत्रारम्भः |
| २ तः ७-७-०९ | शिक्षाशास्त्रिच्छात्राणां प्रवेशप्रक्रिया। |
| २५ तः २७.७.०९ | जयपुरे प्राकृतभाषाविषयकराष्ट्रियसङ्गोष्ठी |
| २.८.०९ | संस्कृतमहोत्सवोद्घाटनम्-विद्वत्सपर्या पूर्वाह्णे, शास्त्रचर्चा-अपराह्णे |
| ३.४.०९ | कविसपर्या |
| ४.८.०९ | सं.वि.वि., कुलपतीनां सम्मेलनम् |
| ५.८.०९ | संस्कृतदिवसः |
| ६ तः ७.७.०९ | छात्राणां स्पर्धाः |
| ८.८.०९ | संस्कृतमहोत्सवसमापनम् |
| २२.८.०९ | मद्रपुर्यां वी.राघवन्स्मृतिव्याख्यानम् |
| १ तः ६.९.०९ | विश्वसंस्कृतसम्मेलने पण्डितपरिषद्, कविसम्मेलनं च (टोक्यो नगरे) |
| ७-९-०९ | पं. गोपीनाथकविराजस्मृतिव्याख्यानम् (लखनऊपरिसरे) |
| ९.९.०९ | मुम्बय्यां-परिसरस्य नवभवननिर्माणारम्भः |
| १२-९-०९ | तृतीयः दीक्षान्तसमारोहः (नवदेहल्याम्) |
| २२ तः २४.९.०९ | नवदेहल्यां पालिविषयेऽन्ताराष्ट्रिया सङ्गोष्ठी |
| २४.९.०९ | विजयदशमी |
| ९ तः १०.१०.०९ | पूर्वोत्तरराज्यानां संस्कृतं प्रत्यवदानम्-राष्ट्रिया सङ्गोष्ठी गेङ्टोकनगरे |
| १५.१०.०९ | संस्थानस्थापनादिवसः, राधाकृष्णन्स्मृति-व्याख्यानं च (मुख्यालये)। |
| १७ तः १८.१०.०९ | दीपावली |
| २० तः ३०.१०.०९ | राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषत्समितेः निरीक्षणयात्रा |
| ७.११.०९ | म.म. मधुसूदन-ओझा-स्मृति-व्याख्यानम् (जयपुरपरिसरे) |
| १० तः १२.११.०९ | कौमुदीमहोत्सवः |
| २७ तः ३०.११.०९ | युवमहोत्सवः, शलाकापरीक्षा-जयपुरपरिसरे |
| ३०.११.०९ तः ०२.१२.०९ | अखिलभारतशास्त्रीयवाक्स्पर्धाः |
| १६.३.१० | चान्द्रमानयुगादिः |







शृङ्गेर्यां प्रवृत्त-नाट्यकार्यशालासम्बद्धानि विविधानि दृश्यानि








Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.I No.4 Pub. by the Registrar for Rashtriya Sanrkrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007